पन्नः प्राप्यन्ते॥ अहङ्कारादिव्यामोहनिवृत्तिस्त्वत्कथाश्रवणं विना नास्तीत्याहुः॥ त्वन्मायेति॥ अर्थं पुरुषार्थं साधनं क
लेवरं अभिपद्य प्राप्य त्वन्मायया अस्मिन्ममेदमहमिति चाभिमानं कृत्वा दुर्मतिरात्ममोहं युष्मत्कथामृतनिषे
वकः॥ उद्व्युदस्येत् त्यजेदित्यन्वयः॥ नन्वेवमादिभिरपि दिविमोहः तितः समपरित्यजेदेवत्यानेत्याहुः तिमो॥

चिद्दुर्मतिः असत्यविषयेषु वलालसात्मा यस्य स
समवेत॥४४॥

ब्रह्मणोस्तु वेति ॥ त्वमिति त्रिभिः ॥ सदस्यास्त्वऋत्विजश्च ॥ ४५ ॥ गां पृथ्वीं रसायाः रसापा रसातलात् दंष्ट्रया उद्
जहर्थ विशेषणाणि ऊर्ध्वानसि ॥ योगिभिः स्तूयमानः हे त्रयीगात्र वेदमूर्ते ॥ यज्ञो यागः सद्रूपस्तद्विशेषः
क्रतवस्तद्रूपायज्ञ संकल्परूप इति वा ॥ यज्ञः क्रतुः कर्म यस्येति वा ॥ ४६ ॥ सत्वमस्माकं तव दर्शनमाकांक्षतां

॥ ४७ ॥

ब्रह्मणो ऊचुः ॥ त्वं क्रतुस्त्वं हविः त्वं हुताशः स्वयं त्वं हि मंत्रः समिद्दर्भपात्राणि च ॥ त्वं सदस्यर्त्विजो
दंपती देवता अग्निहोत्रं स्वधा सोम आज्यं पशुः ॥ ४५ ॥ त्वं पुरा गां रसाया महासूकरो दंष्ट्रया पद्मिनीं वार
णेंद्रो यथा ॥ स्तूयमानो नदल्लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्र यज्ञक्रतुः ॥ ४६ ॥ स प्रसीद त्वमस्मा
कमाकांक्षतां दर्शनं ते परिभ्रष्टसत्कर्मणां ॥ कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते यज्ञविघ्नाः क्षयं यां
ति तस्मै नमः ॥ ४७ ॥ मैत्रेय उवाच ॥ इति दक्षः कविर्यज्ञं भद्र रुद्राभिमर्शितं ॥ कीर्त्यमाने हृषीकेशे सन्नि
न्ये यज्ञभावने ॥ ४८ ॥ भगवान्स्वेन भागेन सर्वात्मा सर्वभागभुक् ॥ दक्षं बभाष आभाष्य प्रीय

प्रसीद ॥ अस्मिन्यज्ञमण्डपे दृश्यस्थः ॥ नचाशक्यं तवैतत् ॥ यतस्तव नाम्नि कीर्त्यमाने एव यज्ञविघ्नाः
क्षयं यांति ॥ एवं प्रभावो यः तस्मै नमः ॥ ४७ ॥ इत्यनेन प्रकारेण सर्वैः कीर्त्यमाने ॥ हे भद्र विदुर ॥ सन्निन्ये
प्रवर्तयामास ॥ ४८ ॥ सर्वात्मतया सर्वभागभोक्तापि भगवान्द्विजानंदत्तेनापि स्वेन भागेन त्रिकपालपुरो
डाशेन प्रीयमाण इव दक्षमाबभाषे संबोधयन्नाभाष्य ॥ ४९ ॥

योऽहं जगतः कारणं आत्मा चेश्वरश्च उपद्रष्टा साक्षी च स्वप्रकाशश्च निरुपाधिश्च स एव ब्रह्मा च शर्वश्च।
भा॰ च॰ २९ स एव सः ॥५०॥ कुत इत्यत आह ॥ अहमेवात्ममायामधिष्ठाय जगत्सृष्ट्यादि कुर्वन् सर्वशक्तियोजितां संज्ञां
धारयामि ॥५१॥ तस्मिन्केवले द्वितीये समानासमानजातीयभेदरहिते ब्रह्मणि मयि ॥ ब्रह्मरुद्रौ भूता-
नि च भेदेनाज्ञः पश्यतीत्यर्थः ॥५२॥ विद्वांस्तु न पश्यतीति सदृष्टान्तमाह यथेति ॥५३॥ तस्माद्देवमेक-

श्रीभगवानुवाच ॥ अहं ब्रह्मा च शर्वश्च जगतः कारणं परं ॥ आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः ॥५०॥
आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज ॥ सृजन्रक्षन्हरन्विश्वं दध्रे संज्ञां क्रियोचितां ॥५१॥ तस्मि-
न्ब्रह्मण्यद्वितीये केवले परमात्मनि ॥ ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ॥५२॥ यथा पुमा-
न्न स्वाङ्गेषु शिरःपाण्यादिषु क्वचित् ॥ पारक्यबुद्धिं कुरुते एवं भूतेषु मत्परः ॥५३॥ त्रयाणामेकभा-
वानां यो न पश्यति वै भिदां ॥ सर्वभूतात्मनां ब्रह्मन्स शान्तिमधिगच्छति ॥५४॥ मैत्रेय उ॰ ॥ एवं भग-
वतादिष्टः प्रजापतिपतिर्हरिं ॥ अर्चित्वा क्रतुना स्वेन देवानुभयतोऽयजत् ॥५५॥ रुद्रं च स्वेन भागेन
ह्युपाधावत्समाहितः ॥ कर्मणोदवसानेन सोमपानितरानपि ॥ उदवस्य सहर्त्विग्भिः सस्नाव ॥ श्री ॥

पश्यन्कृतार्थो भवतीत्याह ॥ त्रयाणामेकोभावः स्वरूपं येषां ॥५४॥ स्वेन क्रतुना त्रिकपालेष्टा उभयतः श्रे- २९
गैः प्रधानेन च ॥५५॥ स्वेन भागेन यज्ञावशिष्टेन ॥ उदवस्यते समाप्यते । नेनेत्युदवसानं तेन कर्मणा सोम-
पानितरानपि ॥ उपाधावदित्यनुषङ्गः ॥ ततश्च उदवस्य कर्म समाप्य अवभृथरूपं यथा भवति तथा स्ना-

हैनैवानुभावेनावामसाधमेसं प्राप्तसिद्धयेतस्मास्त्रपि ॥ ५७ ॥ ५८ ॥ आत्मं केभजतेसम्यनन्यभावात्
मेकैवगतिर्यस्त ॥ प्रलयकालेहमास्यातिर्यस्व रमिव ॥ ५९ ॥ बृहस्पतेः शिष्यान्मयाश्रुत ॥ ६० ॥ परय
विंश्य आकर्ण्यतथानुकीर्तयेत्स आत्मनः ॥ परस्यापि अयं संसारव्यमनं सर्वदाप्नोति ॥ ६१ ॥ इति

तस्मात्वमनन्यभावेन त्वेनैवावामसाधसे ॥ धर्मएवमतिं दत्वा त्रिदशास्ते दिवं ययुः ॥ ५७ ॥ एवं दाक्षा
यणी हित्वा सती पूर्वकलेवरं ॥ जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम ॥ ५८ ॥ तमेव दयितं भूय
आवृङ्क्ते पतिमंबिका ॥ अनन्यभावैकगतिं शक्तिः सुप्तेव पूरुषं ॥ ५९ ॥ एतद्भगवतः शंभोः कर्म दक्ष
ाध्वरद्रुहः ॥ श्रुतं भागवताच्छिष्यादुद्धवान्मे बृहस्पतेः ॥ ६० ॥ इदं पवित्रं परमीशचेष्टितं यश
स्यमायुष्यमघौघमर्षणं ॥ यो नित्यदाकर्ण्य नरोनुकीर्तयेद्धुनोत्यघं कौरव भक्तिभावतः ॥ ६१ ॥
इति श्रीभागवते महापुराणे चतुर्थस्कंधे सप्तमोध्यायः ॥ ७ ॥ मैत्रेय उवाच ॥ सनकाद्या नारदश्च ऋभुर्हंसोरुणिर्य
तिः ॥ नैते गृहान्ब्रह्मसुता ह्यावसन्नूर्ध्वरेतसः ॥ १ ॥

वत्तुर्थे सप्तमः ॥ ७ ॥ दक्षकन्यान्वयेप्राग्वद्दक्षयज्ञकथोदिता ॥ मनुपुत्रान्वयेप्राग्वाभुवचर्योथ पंचभिः
अष्टमेगुरुदारोक्तिरोषमत्सरतः पुमान् ॥ निर्गतेनध्रुवेणाहरिंतपसातोषणंहरेः ॥ एवंतावद्दक्षकन्यान्वयोक्ते
वमरीच्यादीनां ब्रह्मपुत्राणांवंशावर्णिताः ॥ तत्रावशिष्टकिं विहाय ॥ सनकाद्याइतिनावसन्नाश्रिताः ॥

ऊर्ध्वरेतसो नैष्ठिकाः ॥ अतस्तेषां वंशो नास्ति ॥ १ ॥

भा॰च॰ ४

अधर्मोऽपि ब्रह्मणः पुत्रस्तस्य वंशमाह ॥ मृषेति चतुर्भिः ॥ दंभः परप्रतारणं माया ततुर्विज्ञातचेष्टा तयोः सोदर
योरपि दांपत्यमधर्मोक्ततया ॥ एवमुत्तरत्रापि अप्रजाः अपुत्रः ॥ २ ॥ निकृतिः शठता यया भ्यां कलिश्च तत्
स्वसा दुरुक्तिः कलिश्चेत्यर्थः ॥ ३ ॥ यातना तीव्रवेदना ॥ ४ ॥ प्रतिसर्गोऽनुसर्ग एव ॥ यद्वा प्रतिसर्गः ॥ प्रलयः ॥ अ

॥ ९८ ॥ श्री

मृषाधर्मस्य भार्यासीद्दंभं मायां च शत्रुहन् । असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजाः ॥ २ ॥ तयोः स
मभवल्लोभो निकृतिश्च महामते । ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः ॥ ३ ॥ दुरुक्तौ कलि
राधत्त भयं मृत्युं च सत्तम । तयोश्च मिथुनं जज्ञे यातना निरयस्तथा ॥ ४ ॥ संग्रहेण मयाख्यातः प्र
तिसर्गस्तवानघ । त्रिः श्रुत्वैतत्पुमान्पुण्यं विधुनोत्यात्मनो मलं ॥ ५ ॥ अथातः कीर्तये वंशं पुण्य
कीर्तेः कुरूद्वह । स्वायंभुवस्यापि मनोर्हरेरंशांशजन्मनः ॥ ६ ॥ प्रियव्रतोत्तानपादौ शतरूपापतेः सु
तौ । वासुदेवस्य कलया रक्षायां जगतः स्थितौ ॥ ७ ॥ जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः
सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः ॥ ८ ॥ एकदा सुरुचेः पुत्रमंकमारोप्य लालयन् । उत्तमं
नारुरुक्षंतं ध्रुवं राजाभ्यनंदत ॥ ९ ॥ तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवं । सुरुचिः शृण्वत

धर्मस्य फलं यद्देवत्वात्यतिसर्गत्वं एतत् एतमधर्मवंशं ॥ शृण्वन्मितिवर्जनं ज्ञात्वा पुण्यहेतुत्वात् ॥ ५ ॥ मनोः पु
त्रवंशं हरेरंशो ब्रह्मा तत्सांशाद्देहाद्धांजन्म यस्य ॥ ६ ॥ जगतो रक्षायां स्थितौ ॥ ७ ॥ सुनीतिः सुरुचिश्च जाये
तयोर्मध्ये ॥ ८ ॥ तयोः प्रियप्रियत्वे प्रपंचयन् ॥ ध्रुवचरितमाह पंचभिरध्यायैः सुरुचेः पुत्रमुत्तमसंज्ञं लाल

गर्वं(?)तिमेवाह त्रिभिः नेति ॥ नृपतेर्धिष्ण्यमासनं नृपात्मजो विभवान्नारोढुमर्हति ॥११॥१२॥ पुरुषमीश्वरं ॥१३॥
मिषंतं पश्यंतं सन्नवाचं रुद्धवाचं ॥१४॥ उदूह्य आरोप्य ततः पौरमुखात् श्रुत्वा ॥१५॥ शोक एव दावाग्निस्तेन
दावाग्निना तालेनेव स्थिता सा बाला विलापं चकार ॥१६॥ वृजिनस्य दुःखस्य अमंगलमपराधं परेषु मा मंस्था

न वत्स नृपतेर्धिष्ण्यं भवानारोढुमर्हति ॥ न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मजः ॥११॥ बालोसि त व
नात्मानमन्यस्त्रीगर्भसंभवं ॥ नूनं वेद भवान्यस्य दुर्लभेर्थे मनोरथः ॥१२॥ तपसाराध्य पुरुषं तस्यैवा
नुग्रहेण मे ॥ गर्भे त्वं साधयात्मानं यदीच्छसि नृपासने ॥१३॥ मैत्रेय उवाच ॥ मातुः सपत्न्याः सदुरुक्ति
विद्धः श्वसन्रुषा दंडहतो यथाहिः ॥ हित्वा मिषंतं पितरं सन्नवाचं जगाम मातुः प्ररुदन्सकाशे ॥१४॥
तं निःश्वसंतं स्फुरिताधरोष्ठं सुनीतिरुत्संग उदूह्य बालं ॥ निशम्य तत्पौरमुखान्नितांतं सा विव्यथे यद्ग
दितं सपत्न्या ॥१५॥ सोत्सृज्य धैर्यं विललाप शोकदावाग्निना दावलतेव बाला ॥ वाक्यं सपत्न्याः स्म
रंती सरोजश्रिया दृशा बाष्पकलामुवाह ॥१६॥ दीर्घं श्वसंती वृजिनस्य पारमपश्यती बालकमाह
बाला ॥ मामंगलं तात परेषु मंस्था भुंक्ते जनो यत्परदुःखदस्तत् ॥१७॥ सत्यं सुरुच्याभिहितं भवा
न्मे यद्दुर्भगाया उदरे गृहीतः ॥ स्तन्येन वृद्धश्च विलज्जते यां भार्येति वा वोढुमिडस्पतिर्मां ॥१८॥

पयतः परेभ्यो दुःखदः स इति यः सः स्वदत्तमेव दुःखं भुंक्ते ॥१७॥ दुर्भगया मया उदरे गृहीतः तस्याः एव स्तन्येन वृ
द्धश्च ॥ दुर्भगत्वमेवाह यां मां इडस्पतिः ॥ भूपतिर्भार्येति वोढुं स्वीकर्तुं विलज्जते ॥ वाशब्दाद्दासीमित्यपि ॥१८॥

पितृभार्येति वेन समामात्रामातः सपत्नीतयाः प्रियस्याः प्रियपुत्रं तत्पुत्रमाराध्य पुरुषमितितत ॥ आतिष्ठकुरु
भा॰ च॰ श्रुध्यासनेयदीक्षसि ॥ १९ ॥ पतिं च निषेव्य विभावनाय पालनायासीकृतागुणाभिपतिः सत्वगुणाधिष्ठा
११ नेयेन तस्य जितमात्मा मनः स्वमनसा णात्स्वयैस्तै रभिवंद्यं ॥ २० ॥ एकमत्याम सर्वीनयामिरिष्टो ॥ २१ ॥ मृग्याप

आतिष्ठतत्तातविमत्सरस्त्वमुक्तं समाप्यापियस्थलीकं ॥ आराधयायोधोक्षजपादपद्मं यदीच्छसे
ध्यासनमुत्तमो यथा ॥ १९ ॥ यस्यांत्रिपद्मपरिचर्य विश्वविभावनायात गुणाभिपत्तेः ॥ अजोध्या
तिष्ठतपलपारमेष्ठ्यं पदंजितात्मश्वसनाभिवंद्य ॥ २० ॥ तथा मनुर्वो भगवान्पितामहोयमेकमत्या पु
२४ रुदक्षिणाभिरीजे ॥ इष्ट्वाभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यं ॥ २१ ॥ तमेव वत्साश्रय भृत्य
वत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिं ॥ अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषं ॥ २२
नान्यं ततः पद्मपलाशलोचनात् दुःखच्छिदं ते मृगयामि कंचन ॥ यो मृग्यते हस्तगृहीतपद्मया
श्रियेतरैरंगविमृग्यमाणया ॥ २३ ॥ मैत्रेय उवाच ॥ एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः ॥ संनिय
म्यात्मनात्मानं निश्चक्राम पितुः पुरात् ॥ २४ ॥

दाज्ञयोः पद्धतिर्मार्गो यस्य तमेवाश्रय शरणं व्रज ॥ ततो भजस्वनायस्मिन् निजधर्मैर्भाविते शोधिते ॥ २२
नमेवेमनेन नमूचितं ॥ सर्वीनमतंमपंच ॥ तामस्मिति ॥ हस्तेनगृहीतं यद्" पद्मं यया ॥ इतरैर्ब्रह्मादि ११
भिः ॥ २३ ॥ संजल्पितं विलापं ॥ तमच ॥ अर्थस्यागमो यस्मात्तथाभूतं वच आकर्ण्य ॥ २४ ॥ ॥

२५ ॥ विस्मितस्त्वस्मृतं ॥ तदेवाह ॥ अहो तेजः प्रभवः ॥ २८ ॥ २९ ॥ विकल्पे मानापमान विवेके सत्यपि भिन्नानसं
तिकिं तमोहकल्पि एव तत्प्रयं ॥ कृतः यत्र त्वं वा तन्निजकर्मभिरेव भवति यतः ॥ ३० ॥ उपशमोपदेशेन
निवर्त्तयति ॥ परित्वछेदितिषड्भिः ॥ ईश्वरस्य गतिं वीर्य ईश्वरात्कल्पे विनायोगमाः फलं हि तवश्रुतिस्तातो

नारदस्तदुपकारिप्यज्ञात्वा चास्य चिकीर्षितं ॥ स्मृष्ट्वा मृदुत्पन्नचन्द्रेन पाणिना माह विस्मितः ॥ २५ ॥ अहो
तेजः त्वच्चियाणां मानमेवं विमृष्यतां ॥ बालोप्ययं हृदयं तन्त्र यत्समानरसदृच ॥ २६ ॥ नारद उवाच ॥
नाधुनाप्यवमानं ते सम्मानं चापि पुत्रक ॥ लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु ॥ २७ ॥ विकल्पे वि
द्यमानेपि नह्यसन्तोषहेतवः ॥ पुंसो मोहमृते भिन्ना यल्लोके निजकर्मभिः ॥ २८ ॥ परितुष्येत्ततस्तात
तावन्मात्रेण पूरुषः ॥ दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बुधः ॥ २९ ॥ अथ मात्रोपदिष्टेन योगेनावरु
रुत्ससि ॥ यत्प्रसादं स वै पुंसां दुराराध्यो मतो मम ॥ ३० ॥ मुनयः पदवीं यस्य निःसङ्गेनोरुजन्मभिः ॥ न
विदुर्मृगयन्तोपि तीव्रयोगसमाधिना ॥ ३१ ॥ अतो निवर्त्ततामेष निर्बन्धस्तव निष्फलः ॥ यतिष्यति भ
वान्काले श्रेयसां समुपस्थिते ॥ ३२ ॥ यस्य यद्दैवविहितं स तेन सुखदुःखयोः ॥ आत्मानं तोषयन्देही

२६ ॥ दुःकरस्य तव सन्त्रयसः त्वाह यये तिद्वाभ्यां ॥ यस्य प्रसादं स वै दुं मा समिच्छसि ॥ ३० ॥ निःसंगेन तीव्रयो
गयुक्तेन समाधिना मृगयन्तोपि यस्य पदवीं मार्गं न विदुः स देवो दुराराध्यः ॥ ३१ ॥ श्रेयसां काले हृहते ॥ ३२ ॥
सुखदुःखयोर्मध्ये सुखं वसति दुःखं दीयते दुःखे सति यापं दीयते ॥ आत्मानं तोषयंस्तमसः पारमोत्यय

॥ ४४ ॥

किंच॥गुणैरधिकात्पुंसः इति॥ल्यब्लोपे पंचमी॥तं दृष्ट्वा प्रीतिं कुर्यात् न तु न्यूनतामित्यर्थः॥अनुक्रोशं कृ
पां कुर्यात॥न तु तिरस्कारं समानान्मैत्रीं न तु स्पर्द्धां॥३४॥३५॥तादृक्स्वभावाभाववतः॥अतएवाविनीतस्य
दुर्वाक्यबाणैर्भिन्ने हृदि न श्रयते न तिष्ठति॥३६॥अन्यैरधिष्ठितं त्रिभुवने उत्कृष्टं पदं जेतुमिच्छोर्मे साधुव

गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात्॥मैत्रीं समानादन्विच्छन्न तापैरभिभूयते॥३४॥ध्रु
व उवाच॥सोयं शमो भगवता सुखदुःखहतात्मनां॥दर्शितः कृपया पुंसां दुर्दर्शोस्मद्विधैस्तु यः
३५॥अथापि मे विनीतस्य क्षात्रं घोरमुपेयुषः॥सुरुच्या दुर्वचोबाणैर्न भिन्ने श्रयते हृदि॥३६॥प
दं त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे॥ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितम्॥३७॥नू
नं भवान्भगवतो योंगजः परमेष्ठिनः॥वितुदन्नटते वीणां हितायार्थं जगतोर्कवत्॥३८॥इत्युदा मैत्रेय उ॰
हृतमाकर्ण्य भगवान्नारदस्तदा॥प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकंपया॥३९॥नारद उवाच॥
जनन्याभिहितः पंथाः स वै निःश्रेयसस्य ते॥भगवान्वासुदेवस्तं भज तं प्रवणात्मना॥४०॥ध
र्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः॥एकं ह्येव हरेस्तत्र कारणं पादसेवनं॥४१॥

मे मार्गं ब्रूहि॥३७॥अंगज इति पादेउत्संगात् जातो यो नारदः स भगवान्॥तत्र लिंगं वितुदन् हिताय
चरति॥३८॥३९॥निःश्रेयसस्य अभिप्रेतार्थस्य पंथाः कोसावित्यत आह॥भगवान्वासुदेव एव
एतत्स्वं भजस्व॥४०॥४१॥

मधुवनाख्यं तरंगच्छ ॥ यत्र मधुवने ॥ ७३ ॥ अथ ध्यानाद्यभावेपि आत्मन उचितानि यानि दैवतानि नमस्कारा-
दीनि कुर्वीत नियमनियमयुक्ताः ॥ आसनकल्पने चक्रशौचादिभिः मृत्तिकादिभिः ॥ ७४ ॥ प्राणेंद्रियमनसा
मलं चाचल्यं च शुद्ध्येति प्राणायामप्रत्याहारौ धारणामाह ॥ अभिध्यायेदित्यादिषड्भिः ॥ गुरुणा धीरेण म

तत तात गच्छ भद्रं ते यमुनायास्तटं शुचि ॥ पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥ ७५ ॥ स्नात्वानु
सवनं तस्मिन्कालिंद्याः सलिले शिवे ॥ कृत्वोचितानि निवसन्नात्मनः कल्पितासनः ॥ ७६ ॥ प्राणा
यामेन त्रिवृता प्राणेंद्रियमनोमलं ॥ शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुं ॥ ७७ ॥ प्रसादाभिमु
खं शश्वत्प्रसन्नवदनेक्षणं ॥ सुनासं सुभ्रुवं चारुकपोलं सुरसुंदरं ॥ ७८ ॥ तरुणं रमणीयांगमरुणो
ष्ठेक्षणाधरं ॥ प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवं ॥ ७९ ॥ श्रीवत्सांकं घनश्यामं पुरुषं वनमा
लिनं ॥ शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजं ॥ ८० ॥ किरीटिनं कुंडलिनं केयूरवलयान्वितं ॥ कौस्तु
भाभरणग्रीवं पीतकौशेयवाससं ॥ ८१ ॥ कांचीकलापपर्यस्तं लसत्कांचननूपुरं ॥ दर्शनीयतमं
शांतं मनोनयनवर्द्धनं ॥ ८२ ॥

नमः ॥ गुरुं श्रीहरिं ॥ ८३ ॥ सुरेषु सुंदरं ॥ ८४ ॥ रमणीयान्यंगानि य
स्य ॥ ओष्ठश्च ईक्षणे च अरुणे ओष्ठेक्षणे अधरो यस्य तं तथा तमरुण ओष्ठमीक्षणां चाधरमत्यर्थं धारयतीति वा
नृम्णो सुखकरं यद्वा ॥ नृम्णं धनं सर्वपुरुषार्थनिधिमित्यर्थः ॥ ८५ ॥ पुरुषं पुरुषलक्षणसंयुक्तं ॥ ८६ ॥ कौस्तु
भस्याभरणं ग्रीवा यस्य ॥ ८७ ॥ कांचीकलापेन च पर्यस्तं परिवेष्टितं मनोनयनयोर्वर्द्धनं हर्षकरं ॥ ८८

हृत्पद्मकर्णिकायां धिष्ण्यं मध्यस्थानं तदाक्रम्य मनश्चेतनामात्मनि मनसि स्थितं ॥ ५० ॥ आनमाह ॥ स्मय-

भा॰ च॰ मानमिति ॥ नियतेन प्रागुक्तया धारणया प्रस्थितेरगात् ॥ अतएवैकभूतेन एकाग्रेण धारणात्मकानि विश्व-

११ घ्राणध्याने पिङ्ग्रहणानि ॥ यद्वा यथोक्तमात्रमेव ॥ तदुक्तमेकादशस्कन्धे नान्यानि चिन्तयेद्भूयः स्मितं भा

पद्मज्ञानं त्वमणिश्रेण्या विलसज्ज्ञां समर्चितां ॥ हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितं ॥ ५० ॥ स्म-
यमानमभिध्यायेत्सानुरागावलोकनं ॥ नियतेनैकभूतेन मनसा वरदर्षभं ॥ ५१ ॥ एवं भगवतो रूपं
सुभद्रं ध्यायतो मनः ॥ निर्वृत्या परया तूर्णं सम्पन्नं न निवर्तते ॥ ५२ ॥ जपश्च परमो गुह्यः श्रूयतां मे
नृपात्मज ॥ यं सप्तरात्रं प्रपठन्पुमान्पश्यति खेचरान् ॥ ५३ ॥ ओं नमो भगवते वासुदेवाय ॥ मन्त्रेणाने-
न देवस्य कुर्याद्द्रव्यमयीं बुधः ॥ सपर्यां विविधैर्द्रव्यैर्देशकालविभागवित् ॥ ५४ ॥ सलिलैः शुचिभि-
र्माल्यैर्वन्यैर्मूलफलादिभिः ॥ शस्ताङ्कुरांशुकैश्चार्चेत्तुलस्या प्रियया प्रभुं ॥ ५५ ॥ लब्ध्वा द्रव्यमयीमर्चां
क्षित्यम्ब्वादिषु वार्चयेत् ॥ आभृतात्मा मुनिः शान्तो यतवाङ्मितवन्यभुक् ॥ ५६ ॥ स्वेच्छावतारचरितैर-
चिन्त्यनिजमायया ॥ करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयङ्गमं ॥ ५७ ॥

वयेन्मुखमिति ॥ ५१ ॥ सम्पाद्य इमा हृदयेव
मिति ॥ नृत्तांश्च शीघ्रं सम्पन्नं मत ॥ ५२ ॥ जपश्चोमन्त्रः ॥ ५३ ॥ द्रव्यमयीं बाह्यसलिलैरिति ॥ शस्तैर्दूर्वाङ्कुरैर्वस्यैर्वस्त्रैः श्रुक्के
भूर्जेत्वलगारिभिः ॥ ५५ ॥ अधिष्ठानमेवाह लब्ध्वा सम्पाद्य ॥ द्रव्यमयीं शिलादिभिर्निर्मितां ॥ पूजां षड्भ्रणेहे
नूनाहमाद्धेहरभ्य ॥ आभृतात्मा भृतचित्तः ॥ मितवन्यभुक् इतितया ॥ ५६ ॥ यत्करिष्यतीति तदानीमव

॥ ८३ ॥ श्रीमद्भागवतटीका ११

पूर्वंसेविताःसेवनंकारिताः॥कार्यंतेनविहिताइत्यर्थः॥मंत्रद्वयेनद्वादशाक्षरेण॥५८॥एवमक्करीत्या
मनोगतेयथाभवतितथाकार्यादिभिर्भक्तिमत्स्यापरिचर्ययापरिचर्यमाणोयमर्थकामेषुयद्भिमते
ततश्श्रेयोदिशतीतिद्वयोरन्वयः॥५९॥विरक्तोभजेत्किमर्थंविरक्तये॥६०॥हरेश्चरणाभ्यांचर्चितेमंडिते॥

परिचर्याभगवतोयावत्यःपूर्वंसेविताः॥तामंत्रहृदयेनैवप्रयुंज्यान्मंत्रमूर्तये॥५५॥एवंकायेन
मनसावचसाचमनोगते॥परिचर्यमाणोभगवान्भक्तिमत्परिचर्यया॥५६॥पुंसाममायिनां
सम्यग्भजतांभाववर्द्धनः॥श्रेयोदिशत्यभिमतंयद्धर्मादिषुदेहिनां॥५७॥विरक्तश्चेंद्रियरतौभ
क्तियोगेनभूयसा॥तंनिरंतरभावेनभजेताद्धाविमुक्तये॥५८॥इत्युक्तस्तंपरिक्रम्यप्रणम्यच
नृपार्भकः॥ययौमधुवनंपुण्यंहरेश्चरणचर्चितं॥५९॥तपोवनंगतेतस्मिन्प्रविष्टोंतःपुरंमुनिः
अर्हितार्हणकोराज्ञासुखासीनउवाचह॥६०॥नारदउवाच॥राजन्किंध्यायसेदीर्घंमुखेनप
रिशुष्यता॥किंवानरिष्यतेकामोधर्मोवार्थेनसंयुतः॥६१॥राजोवाच॥सुतोमेबालकोब्रह्म
न्स्त्रैणेनाकरुणात्मना॥निर्वासितःपंचवर्षःसहमात्रामहान्कविः॥६२॥अप्यनाथंवनेब्रह्म
न्मास्मादंत्यर्भकंवृकाः॥श्रांतंशयानंक्षुधितंपरिम्लानमुखांबुजं॥६३॥

६०॥अर्हितंसत्कृत्यसमर्पितंअर्हणमर्चादियस्मै॥६१॥किंवानरिष्यतेनश्यतीतिसवितर्कः॥पश्वः
६२॥मात्रासहनिर्वासितइतितस्याअप्यनाथत्वात्॥६३॥मास्मादंतिकिंस्विद्भक्षयंतीत्यर्थः॥६४॥

९२॥ यस्य यशो जगत्प्राप्नुते प्राप्नोति ॥ ९३॥ विपुलयन् विस्तारयन् ॥ ९४॥ ७१॥ फलोमपुवने किमरोदितिय पे
भा॰च॰ १४ ताया माह ॥ तत्रेत्यादिना ॥ अभिषिक्तः स्नातः यस्मा प्रास्तो ॥ ७२॥ कपित्थानि दशाणि च अशनं यस्य स्या

अहोमेव तदा रात्स्यं स्त्री जितमोप्यारय ॥ योकं प्रेम्णा हृदुनं तेनाभ्यनं दमसत्तमः ॥ ९३॥ ना२ दउ
वाच ॥ मामास्तु चः हतनयं देवगुमविशांपते ॥ तत्प्रभावमविज्ञाय प्राप्नोते यय शो जगत् ॥ ९४॥ म
उष्कस्कमस्कृता लोकपालैरपि प्रभुः ॥ एष्यमविरतो राजन्यशो विपुलयंस्तव ॥ ९५॥ मैत्रेयउवाच
इति देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः ॥ राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिंतयत् ॥ ७१॥ तत्रा
भिषिक्तः प्रयतस्तामपेष्य विभावरी ॥ समाहितः पर्यचरदृष्यादेशेन पूरुषं ॥ ७२॥ त्रिरात्रांते त्रि
रात्रांते कपित्थबदराशनः ॥ आत्मवृत्त्यनुसारेण मासं निन्येऽर्चयन् हरिं ॥ ७३॥ द्वितीयं च तथा मासं
षष्ठे षष्ठेऽर्भको दिने ॥ तृणपर्णादिभिः शीर्णैः कृतान्नोऽभ्यर्चयद्विभुं ॥ ७४॥ तृतीयं चानयन्मासं नवमे
नवमेऽहनि ॥ अब्भक्ष उत्तमश्लोकमुपाधावत्समाधिना ॥ ७५॥ चतुर्थमपि वै मासं द्वादशे द्वादशेऽह
वायुभक्षो जितश्वासो ध्यायन् देवमधारयत् ॥ ७६॥

त्मवृत्तिर्देहस्थितिः ॥ तदनुसारेण ॥ ७३॥ १॥ तृतीयं चानयन्नृपषट्विनयन्नपायावदित्यन्वयः ॥ प १४
तिमासमाहारसंकोचतपोतिरेकं च कृतवानित्यर्थः ॥ ७४॥ ७५॥ ॥ ॥

७६॥भूतानिशनैर्धीरोहृदियाणितृ॥आरोपितेयस्मिन्तन्मनआत्मकमन्तर्रूपंपरंब्रह्मआयतन॥७७॥धारयास्मृत
समतःतस्यतेजःसोढुमशक्नुवतःकंपिताः॥७८॥तस्याअंगुष्ठेननिपीडिताआक्रान्तासतीमहीतत्तदाअर्द्धेन
नाम॥समेभेन्द्रेणधिष्ठितागजेन्द्रेणधिष्ठितानौकरिकादशानौशिनोरभेदाच्चैवसमानाधिकरण्यं॥इभेन्द्रेणाधिष्ठितातरी
नौर्यथापदेपदेसव्यतोदक्षिणतश्चनमतितद्वत्॥७९॥अभिध्यानप्रकारमाह॥तस्मिन्नभिध्यायतिविश्वमात्म

पंचमेमासस्वस्थानेजितश्वासोनृपात्मजः॥ध्यायन्ब्रह्मपदैकेनतस्थौस्थाणुरिवाचलः॥७६॥सर्व
तोमनआकृष्यहृदिभूतेन्द्रियाशयं॥ध्यायन्भगवतोरूपंनाद्राक्षीत्किंचनापरं॥७७॥आधारंमहदा
दीनांप्रधानपुरुषेश्वरं॥ब्रह्मधारयमाणस्यत्रयोलोकाश्चकंपिरे॥७८॥यदेकपादेनसपार्थिवा
र्भकस्तस्थौतदंगुष्ठनिपीडितामही॥ननामतत्रार्द्धमिभेन्द्रधिष्ठितातरीवसव्येतरतःपदेपदे॥७९॥
तस्मिन्नभिध्यायतिविश्वमात्मनोद्वारंनिरुध्यासुमनन्यधीया॥लोकानिरुच्छ्वासनिपीडिताभृ
शंसलोकपालाःशरणंययुर्हरिं॥८०॥देवाऊचुः॥नैवंविदामोभगवन्प्राणरोधंचराचरस्याखिल
सत्वधाम्नः॥विधेहितन्नोवृजिनाद्विमोक्षंप्राप्तावयंत्वांशरणंशरण्यं॥८१॥श्रीभगवानुवाच॥मा
भैष्टबालंतपसोदुरत्ययान्निवर्त्तयिष्येप्रतियातस्वधाम॥यतोहिवःप्राणनिरोधआसीदौत्तानपादि
र्मयिसंगतात्मा॥८२॥

केविश्वमात्मनःसकाशात्तुअनन्यधीयाआत्माभेददृष्ट्याअभिध्यायतिसति॥किंकृत्वाअसुंप्राणंतत्
द्वारंचनिरुध्यविश्वमात्मन्येकीकृत्यप्राणनिरोधेकृतेविश्वप्राणनिरोधोजातइतिभावः॥८०॥एवंप्राण
निरोधंकृत्वाविदुर्पिनविद्मः॥अखिलसत्वधाम्नःसर्वप्राणिशरीरस्यततस्माद्वृजिनात्क्लेशात्॥८१॥य
तोवालात्तस्मावालःकश्चनस्मात्प्राणनिरोधःइत्यतआह॥उत्तानपादस्यपुत्रोमयिविश्वरूपेसंगतात्मा

भा०च०
३५

नवमे श्रीहरिस्तुत्यालब्धात्तस्माद्वरान्प्रभुः ॥ प्रत्यगात्माकरोत्सृष्टिं पितामह इतीर्यते ॥ एवं भगवद्ध्याकेन
गतभयाः ॥ १ ॥ स एवं प्रभवं योगस्याविपाकेन दासैन निश्चलयोगगृहादिदृष्टमपुरः स्थितमपि पद्मनेत्रं दृष्टिता
दृष्टोऽनापश्यतत्तदा भगवतैवोक्तः स्वरूपमात्मनः दृश्यतामिति रोहित सुपलद्यद्याउ स्थितः सनतत्स्वरूपं पारंगतः
स्फुरिताः तादृशा ॥ ५ ॥ आगतः साध्वसं जातसम्भ्रमः विनमय्यानतक्रूतासम्भ्रममेवाह ॥ इच्छाप्रवि
मैत्रेय उवाच ॥ तप एव मत्तस्त्र भयाउरुक्रमे कृतावनामाः प्रपश्चात्स्वविषयं ॥ सहस्रशीर्षो पितत्तोग
हत्मतामयोर्वतं सम्यदिदृक्षयामतः ॥ ९ ॥ स एव प्रियायोगविपाकतीव्रपादृष्टस्य सकोश स्फुरितता
उरुत्रमे ॥ तिरोहितं सदृशं वापलद्सवहिः स्थितं तत्स्वरूपं ददर्श ॥ ९ ॥ तद्दर्शनेनागतसाध्वसः स्थिता
ववंदनाभो विनिमय्य दण्डवत् ॥ तम्भांसपपशपत्म पिवत्रिवाभंकं त्रिवत्रिवाम्मतनमेजेरिवाश्लिष
न ॥ १ ॥ स ते विवदितत्मत हि देहहरितोत्तालस्यसर्वस्य चहृयवस्थितः ॥ कृताञ्जलिर्बलमयेनकृ
नापस्पर्शाल्लेकपयाकपोले ॥ ६ ॥ स एव तदेवमतिप्रादितोगिरदेवीपरिज्ञातपरात्मनिर्णयः
तेभक्तिभावाः प्रपर्गणादरस्तवरं परिस्फुतोरुस्तवसंभवदिति ॥ ५ ॥

त्रिवप्रयत्नवंदतत्त्वा स्येनत्रुव
त्रिवावंदनं भुजाभ्यामाश्लिष्यन्निवावंदतेत्यर्थः ॥ १ ॥ विवदतं तं नकृणानवक्रमिच्छतं ॥ यतो हि देहस्थापदि
कार्ते सहजानंतं स्वस्य प्रभवस्य सर्वस्य हृदयवस्थितत्वात् ॥ तानाप्रसन्नमयेनवेदात्मकेनशावेन ॥ ६ ॥ भग
वताप्रतिपादितोगिरसप्रतिपद्येतिशेषः ॥ प्रतिपद्यतामिति पादतो वेदात्मिकापरिज्ञातः परात्मनो
स्वरजीवयोनिर्णयो येन सः अतएव भक्त्याभावः प्रेमयस्य स सतत्त्वस्येर्यनपरितः अतविख्यातउरुस्त्र

ईशानुग्रहसंग्रामवागायद्भृतमूर्तिभिः ॥ द्वादशादित्यसंकाशैः श्लोकैरस्तौद्धरिं ध्रुवः ॥ यो मे प्रसुप्तां लीनां
ईमां वाचमन्यांश्च प्राणानिंद्रियाणि स्वधाम्ना चिच्छक्त्या संजीवयति ॥ यतः अखिलाचक्षुरादिज्ञाना-
क्रियाशक्तीर्धारयतीति तस्मै पुरुषाय प्रणतोस्मीति ॥६॥ ननु वागादींद्रियशक्तिधरा वह्न्यादयः प्रसिद्धा
नाहमेक इति ॥ सत्यं विश्वपुरुषोऽन्तर्यामी त्वमेक एव तस्या मायायाः अप्रसक्तोपींद्रियादिषु स्थितः सन्
तत्तद्देवतारूपेण नानेव भासि ॥ न तु त्वद्व्यतिरेकेण ज्ञानक्रियाशक्तिधरः कश्चिदस्तीत्यर्थः ॥७॥ अपि च ॥

ध्रुव उवाच ॥ योंतःप्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना ॥
अन्यांश्च हस्तचरणश्रवणत्वगादीन्प्राणान्नमो भगवते पुरुषाय तुभ्यं ॥६॥ एकस्त्वमेव भ-
गवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषं ॥ सृष्ट्वानुविश्य पुरुषस्तदसद्गुणे-
षु नानेव दारुषु विभावसुवद्विभासि ॥७॥ त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ
भवत्प्रपन्नः ॥ तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्तबंधो ॥८॥

किं च त्वं ब्रह्मादयो ज्ञानादिशक्तिधरा न भवंतीति ॥ यस्माद्ब्रह्मणोपि ज्ञानं त्वदधीनमेवेत्याह ॥ त्वद्द-
त्तया वयुनया ज्ञानेन भवंतं शरणं प्रपन्नो ब्रह्मा इदं विश्वमचष्ट अपश्यत ॥ कथं सुप्तः पुरुषः प्रबुद्धः
सन् यथा पश्यति तद्वत् ॥ अपवर्गी मुक्तास्तेषामपि शरणं कृतविदा सर्वेंद्रियजीवनेन त्वत्कृत-
मुपकारं जानता कथं विस्मर्यते ॥ एवंभूतं त्वामभजंतः कृतघ्ना इत्यर्थः ॥८॥

भा॰ च॰
३९

ये च मादृशाः कामाद्यर्थं भजंति तेऽपि मूढा इत्याह नूनमिति ॥ भवाप्ययौ जन्ममरणे ताभ्यां विमोक्षो यस्मात्तं त्वामन्यहे-
तोः कामाद्यर्थं भजंति ते ॥ नूनं विमुष्टमतयः वंचितचित्ताः ॥ यतस्ते कल्पतरुं त्वामर्चंति तथा कुणपकल्पेन
देहेनोपभोग्यं सुखमिच्छंति ॥ न च तुच्छाययोग्यं तदित्याह ॥ यत्स्पर्शजं विषयसंबंधजन्यं सुखं तन्नरकेऽपि भवति
॥ ननु ब्रह्मादिसुखं सकामैः प्राप्यते निष्कामभजने तु तस्यादिसुखं यत्राह येति ॥ स्वमहिमनि निजानंदे ब्रह्मण्यपि
मा भूत् न भवतीत्यर्थः ॥ अंतकस्यासिना कालेन लुलितान्नष्टात् विमानात् पततां सा नास्तीति किं वक्त-

नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ॥ अर्चंति कल्पकतरुं कुण-
पोपभोग्यमिच्छंति यत्स्पर्शजं नरकेऽपि नृणां ॥९॥ या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्ज-
नकथाश्रवणेन वा स्यात् ॥ सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किं त्वंतकासिलुलितात्पततां
विमानात् ॥१०॥ भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो भूयादनंत महताममलाशयानां ॥ येनांजसो-
ल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः ॥११॥ ते न स्मरंत्यतितरां प्रियमीश
मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः ॥ ये त्वब्जनाभ भवदीयपदारविंदसौगंध्यलुब्धहृदयेषु कृ-

व्यं ॥१०॥ अतः कथाश्रवणाय सत्संगतिं देहीत्याह भक्तिमिति प्रवहतां सातत्येन कुर्वतां ॥ ननु मोक्षं किं ना-
याचसे यत आह येन महत्प्रसंगेनांजसा यत्नं विना उल्बणं भयानकं नानाविधसितं तं नेष्ये पारं प्राप्स्यामि
भवद्गुणकथैवामृतं तस्य पानेन मत्तः सन् ॥११॥ कथामृतपानस्य माहात्म्यमाह ॥ ते इति ते प्रियमपि
मर्त्यं देहं न स्मरंति तदनुसंबंधिनः ये च सुतादयः मर्त्यमनु संबद्धाः तानपि केनेन स्मरंति ॥ ये कृतप्रसंगाः केषु
भवदीयपदारविंदसौगंध्यलुब्धहृदयेषु ये तेषु ॥ न केवलं योगादिनिष्ठानां देहाभिमा-

३९

श्रीदि

नन्वेवं विद्वानपि त्वं किमित्यभिमानं वहसि अत आह ॥ तिर्यङ्नगादिभिः परिचितं व्याप्तं सदसन्तश्च
विशेषा यस्य महदादीन्यनेकानि कारणानि यस्य ॥ हे परम अज ते तवेदं स्थविष्ठं विराड्रूपं केवलं वेद्मि
न परमेश्वररूपं न वेद्मि ॥ यत्र वादः शब्दप्रपञ्चो नास्ति ब्रह्म तत्स्वरूपं च न वेद्मि अतोऽभिमानान्न निवर्त इति
भावः ॥ तदेवं भगवत्स्थूलरूपं यथा तत्स्वरूपं न ज्ञातं तथा ईश्वररूपमनुवर्णयन्नमस्करोति ॥ कल्पान्त इति ॥ एतत्त्रैलो-
क्यं यः पुमान् शेते स्वस्मिन्नेव दृक् चक्षुर्यस्य योगनिद्रारूढत्वात् ॥ अनन्तसखः शेषसहायस्तदङ्के शेषोत्स-
ङ्गे यस्य नाभिरेव सिन्धुः समुद्रः तस्मिन्रोहतीति तथा तस्य काञ्चनलोकपद्मस्य गर्भे कर्णिकायां द्युमान्

तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषं ॥ रूपं स्थविष्ठमज ते महदाद्य-
नेकं नातः परं परम वेद्मि न यत्र वादः ॥ १३ ॥ कल्पान्त एतदखिलं जठरेण गृह्णन् शेते पुमान् स्वदृगन-
न्तसखस्तदङ्के ॥ यन्नाभिसिन्धुरुहकाञ्चनलोकपद्मगर्भे द्युमान् भगवते प्रणतोऽस्मि तस्मै ॥ १४ ॥
त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः ॥ यद्बुद्ध्यवस्थितिमखण्डि-
तया स्वदृष्ट्या द्रष्टा स्थिता-
वधिमखो व्यतिरिक्त आस्से ॥ १५ ॥

तेजस्वी ब्रह्मा भवति तं प्रणतोऽस्मीत्यर्थः ॥ १४ ॥ ननु ममापि स्वापाद्यवस्थावतः को जीवाद्विशेषस्तत्राह ॥
केवलं तत्स्थितिसिक्तः जीवविलक्षण एवास्तीति यदसि ॥ वैलक्षण्यमेवाह ॥ त्वं नित्यमुक्तः जीवस्तु तत्प्रसादान्मु-
च्यते त्वं परिशुद्धः स तु मलिनः त्वं विबुद्धः स तु तत्त्वं न त्वमात्मा स तु जडः त्वं कूटस्थः अविकारः स तु विकारी ॥ त्व-
मादिपुरुषः स तु आदिमान् ॥ त्वं तु भगवान् स तु भगहीनः त्वं गुणानां त्रयाणामधीशः स तु परतन्त्रः कुत एतद्वै-
लक्षण्यं यतः बुद्धिवस्थितिं तस्य जाग्रदाद्यवस्था अखण्डितया स्वदृष्ट्या चिच्छक्त्या द्रष्टा ... इत्यत आह

[illegible]

भा॰ १०

तमेवं ब्रह्मस्वरूपेण ज्ञातं नमस्करोति ॥ यस्मिन्निति ॥ एतं स्वकस्माद्‌द्भूवंति विश्वस्य भवो यस्मात् एकमा वेऽ
यमनादि ॥ १८ ॥ सकामा भजनादपि मोक्षमाशासाना आह ॥ हे भगवन्पुरुषार्थः परमानंदः स एव मूर्तिर्यस्य ॥
स तस्य तव पादपद्मम् आशिषो राज्यादेः सकाशात्तत्या आशीः परमार्थफलं ॥ हि निश्चितं कस्यते था ते
न प्रकारेण त्वमेव पुरुषार्थरूपेणेति हि कामतया अनुभजतः पद्म्मेवं तथापि हे अर्थं स्वामिन् दीनान्

यस्मिन्निरुद्धगतयो ह्यनिशं पतंति विद्यादयो विविधशक्तय आनुपूर्व्यात् ॥ तद्‌ब्रह्म विश्वभव
मेकमनंतमाद्यमानंदमात्रमविकारमहं प्रपद्ये ॥ १८ ॥ सत्याशिषो हि भगवंस्तव पादपद्ममा
शीस्तथानुभजतः पुरुषार्थमूर्तेः ॥ अप्येवमर्य भगवान्परिपाति दीनान्वाश्रेव वत्समनु
ग्रहकातरोस्मान् ॥ १९ ॥ मैत्रेय उवाच ॥ अथाभिष्टुत एवं वै सत्यसंकल्पेन धीमता ॥ भृत्यानु
रक्तो भगवान्प्रतिनंद्येदमब्रवीत ॥ २० ॥ श्रीभगवानुवाच ॥ वेद तेहं व्यवसितं हृदि राजन्य बा
लक ॥ तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत ॥ २१ ॥ नान्यैरधिष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षिति
यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितम ॥ २ ॥

सकामानप्यस्मान्भगवान्भवान्परिपाति संसारभयात्त्रायेव यत अनुग्रहो हि नाचरणे कातरः पर
वशः यथा नवप्रसूता वाश्रा धेनुर्वत्सं क्षीरं पाययति वृकादिभ्यो रक्षति च तद्वत् ॥ १९ ॥ व्यवसितं कल्पि
तं ॥ २० ॥ तत्प्रयच्छामि सत्कं किं तदिरपेक्षमाह नान्यैरिति सार्द्धाभ्यां ॥ हे भद्र ध्रुवक्षितिर्निवासो य॰

॥ २६ ॥

३२

धान्यायज्ञमणायभ्राम्यमाणानां पशूनां वंधनस्तंभो मेढीनस्यांवलीवर्दसमूहवत ॥ अवांतरकल्पवा
सिनां परस्तादपिस्यात्तु लोकत्रयनाशयन्नस्वरेयुमांग्रादयोनत्तत्रपाः वनौकसः समर्षयः पत्पद
त्तिणीकृत्य भ्रमंतस्त्रारेति ॥ २१ ॥ पतच्चराज्यानेतरंभविष्यतीत्याह ॥ प्रस्थितइति ॥ तमंप्टथिवीदत्वा

मेढ्यांगोचरवत्स्यात्तु परस्तात्कल्पवासिनां ॥ धर्मोग्निः कश्यपः शक्रोमुनयोयेवनौकसः ॥ २१
चरंतिदक्षिणीकृत्यभ्रमंतोयत्सतारकाः ॥ प्रस्थितेतुवनेपित्रादत्वागांधर्मसंश्रयः ॥ २२ ॥ ष
ट्त्रिंशद्वर्षसाहस्रं रक्षिताव्याहतेंद्रियः ॥ तद्भ्रातर्यंतमनेनषुमरायायात्ततस्मनाः ॥ २३ ॥ अवे
षंतीवनेमातादात्रात्रिंसाप्रवेत्स्यति ॥ २३ ॥ रक्षामांयत्नहृदयंयत्तेः पुष्कलदत्तिणाः ॥ भक्ताचे
ह्मिशिषः समाघ्रेतेमासेस्तरिष्यसि ॥ २४ ॥ ततोगंतासिमत्स्यानंसर्वलोकनमस्कृतं ॥ उपरि
ष्टाद्दषिभ्यस्तंयतोंवृत्तनेगतः ॥ २५ ॥ मैत्रेयउवाच ॥ इत्यर्चितःसभगवानतिदिश्यात्मनःपदं ॥ वा
लस्यपश्यतोधाम स्वमगाद्गरुडध्वजः ॥ २६ ॥

वनंप्रस्थिते ॥ भावेतः ॥ वनंप्रतितीर्थगमनेकृतेरक्षितारक्षिष्यसि ॥ २२ ॥ तयाग्रसंकल्पितमपिमत्ज्ञा
स्यतवद्रोहादेवभविष्यतीत्याह ॥ तद्भ्रातरीति ॥ सासरुविः प्रवेत्स्यति ॥ २३ ॥ किंचरक्षामायत्तोहृदयमि
यामूर्तिरंग्यते ॥ २४ ॥ यतः स्थानात ॥ २५ ॥ अतिदिश्यदत्वा ॥ २६ ॥

भा० च०
१८

संकल्पजं मनोरथं पादसेवया प्रापितं ॥ संकल्पस्य निर्वाणं समाप्तिर्यस्मात् ॥२७॥ मायाविनः सकामस्य तत्सुदुर्लभं हरेः पदं तदेकेनैव जन्मना लब्ध्वापि स्वमात्मानं मनः असिद्धार्थं अप्राप्तमनोरथमिव कथ ममन्यत पूर्णार्थविदपि ॥२८॥२९॥ समाधिनेति सार्द्धैः षड्भिः नैकेन अनेकभवाभ्यासेन बहुजन्माभ्यस्तेने त्यर्थः ॥ अमुष्यास्त्र्यादिस्मयेगात्उदितस्य हरेः ॥ पादछायायामाश्रितमात्मानं स्मरन्नाह ॥ छायामु

सोपि संकल्पजं विष्णोः पादसेवोपसादितं ॥ प्राप्य संकल्पनिर्वाणं नातिप्रीतोऽभ्यगात्पुरं ॥२७॥ विदुर उवाच ॥ सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितं ॥ लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मानममन्यतार्थवित् ॥२८॥ मैत्रेय उवाच ॥ मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान्स्मरन् ॥ नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयिवान् ॥२९॥ ध्रुव उवाच ॥ समाधिना नैकभवेन यत्पदं विदुः सनंदादय ऊर्ध्वरेतसः ॥ मासैरहं षड्भिरमुष्य पादयोश्छायामुपेत्यापगतः पृथक्मतिः ॥३०॥ अहो बत ममानात्म्यं मन्दभाग्यस्य पश्यत ॥ भवच्छिदः पादमूलं गत्वा याचे यदन्तवत् ॥३१॥ मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः ॥ यो नारदवचस्तथ्यं नाग्राहिषमसत्तमः ॥३२

पेत्येति पृथक्मतिर्भेददृष्टिः सन् नष्टोऽस्मीति भावः ॥३०॥ अनात्म्यं आत्मभूमसत्वं अन्तवत्वं भवछेतुः स काशात् यदन्तवत् तद्याचे याचितवानस्मि ॥ अन्तवत्वे कारणं संभावयन्नाह ॥ मतिरिति ॥ पतद्भिर्मदपेक्ष या अधःपतिष्यद्भिः ॥ अतएव असहनशीलैः नाधुना अपमानेन तथ्यादि सम्यक् नारदस्य वचो यो नग्र

[illegible] ॥
१८

किंचदेवीमिति॥ अहमं॥ समानिवपश्यन्॥ द्वितीयेऽस्मत्पिभ्रातेव भ्रातृव्यः शत्रुः इति दृष्टुः हृद्दुजा हृदय
शोकेन तत्पतापमनुभवामि॥३३॥ किंच मयाप्रसाद्य यत्प्रार्थितं तत्स्वयं प्रार्थितमामाद्दृभवच्छिद्रमिति॥३६
पत देवमदृष्टांतमाह॥ स्वाराज्यं निजानंदस्वयच्छतः सकाशादभिमानः दीनगुणपेन मया भिक्षितः पावि
तः दीनेन वृत्येनेति वा दृष्टांतपूर्वमेवं वचः॥ यथा धनः ईश्वरात् चक्रवर्तिनः फलीकाः तत्सत्वयंतं तुलकणाया

देवीमायानुपाश्रित्य मम समं धवमितरद्व॥ तस्येद्वितीयेपस्मतिभ्रातृभ्रातृव्यहृद्दुजा॥३३॥ मये
तत्प्रार्थितं स्वयं चिकित्सेव गतायुषि॥ प्रसाद्य जगदात्मानं तपसा दुष्प्रसादनं॥३४॥ भवच्छिद
मयाचेहं भवं भाग्यविवर्जितः॥ स्वाराज्यं यच्छतो मौढ्यात्मानो मे भिक्षितो वत॥३५॥ ईश्वरात्
क्षीणपुण्येन फलीकारानिवाधनः॥ मैत्रेय उ॥ च॥ न वै मुकुंदस्य पदारविंदयो रजोजुषस्तात
भवादृशा जनाः॥ वांछंति तद्दास्यमृतेर्थमात्मनो यदृच्छया लब्धमनःसमृद्धयः॥३६॥ आकर्ण्यात्म
जमायांतं संपरेत्य यथागतं॥ राजा न श्रद्दधे भद्रमभद्रस्य कुतो मम॥३७॥ श्रद्धाय वाक्यं देवर्षेर्ह
र्षवेगेन धर्षितः॥ वार्त्ताहर्तुरतिप्रीतो हारं प्रादान्महाधनं॥३८॥

च तेत दूत॥३५॥ एवं निःस्पृहत्वेन तस्य पुत्रकमित्याह॥ नेति॥ तस्य दास्यं विना अन्यमर्थमात्मनो नैव वांछं
ति॥ यदृच्छयैव लब्धेन मनसः समृद्धिर्येषां ते॥३६॥ प्रस्तुतमाह आकर्ण्येति॥ संपरेत्य मृत्वा आगतं
माकर्ण्य ध्यानं श्रद्दधे विश्वासं न कार॥ अभद्रस्य मम भद्रं कुतः इति मत्वा॥३७॥ पूर्वं पापिनस्त्यविरतं ऋषिदेवर्षे

मा.कु.टी. ॥५४॥

भाव॰
५९

ब्राह्मणादिभिः पर्यस्तः परिवृतः ॥ ३९ ॥ ४० ॥ अस्य राज्ञो महिष्यो मध्ये उत्तमं निधाय एकामेव शिविकां न
रविमानकस्य ॥ ४१ ॥ उपवनस्य आभ्याशे समीपे ॥ ४२ ॥ विषवक्त्रेनाग्निसंस्पर्शेन हत्तमशेषमपवेधनेच यस्य ॥

नरस्त्रंरथमाहृत्यकातिस्वरपरिष्कृतं ॥ बालनीः कुलवृद्धैश्च पर्यस्तो मात्सवंधुभिः ॥ ३९ ॥ शंखदुंदु
भिनादेन ब्रह्मघोषेण वेणुभिः ॥ निस्क्रमपुरात्तूर्णमात्मजाभीत्सोत्सुकः ॥ ४० ॥ स्तवीतिः स्वह
विश्वास्य महिष्याः हेमभूषिते ॥ आरुह्य शिविकां साहैमतमेनाभिजग्मतुः ॥ ४१ ॥ ते दृष्ट्वा पवना
भ्याशे प्रायोते तनरसारथ्यात् ॥ अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः ॥ ४२ ॥ परिरेभे गजं दोर्भ्यां
दीर्घोत्कंठमनाः श्वसन् ॥ विषवक्त्रेनाग्निसंस्पर्शेहताशेषाघवंधन ॥ ४३ ॥ अथाजिघ्रन्सुहुर्मूर्द्धि
शांतैर्नेत्रजवारिभिः ॥ स्नापयामास तनयं जातोदाममनोरथः ॥ ४४ ॥ अभिवंद्यपितुः पादावाशी
र्भिश्चाभिमंत्रितः ॥ ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः ॥ ४५ ॥ सुरुचिरुत्तमं तस्यापादा
वनतमर्भकं ॥ परिष्वज्याह जीवेति वाष्पगद्गदयागिरा ॥ ४६ ॥ यस्य प्रसन्नो भगवान्गुणैर्मैत्र्यादिभि
र्हरिः ॥ तस्मै नमंति भूतानि निम्नमाप इव स्वयं ॥ ४७ ॥

४३ ॥ जात उद्दामो महान्मनोरथो यस्य ॥ ४४ ॥ अभिमंत्रितः पित्राशीर्भिः सहृतेन कृतसंभाषणाः ॥
४५ ॥ ४६ ॥ सुरुच्याः प्रीतिर्नाम मसे भावितेत्याह यस्येति ॥ नमंति प्रवणं संसरंति आपो यथा स्वयमेव निम्नं

श्रीभागवतम् ॥ ५९ ॥

ऊहृतर्द्रंयतः॥४०॥हेवीरवीरसवोप्रभवमानः अभिषिच्यमानाभ्यांस्तनाभ्यांपयस्तदासस्नाव॥५०॥
चिरनष्टः दर्शनमथाप्य रक्षिताररक्षिष्यति॥५१॥५२॥एवमितिव्याहितेपित्राग्रुपलालनपराम शांति
५३॥पुरुवाग्णियति॥तत्रतत्रेतिचवक्षमि॥सद्धेदेःफलमञ्जरीगुम्फैः धृतानापोतेवालवृन्दैः तद्दियैः सद्धेदैः

उत्तमस्त्रप्रभवस्त्रोभावस्पोसंप्रेमविह्वलौ॥अंगासंगाङ्कपलकावस्तोकंसमुङ्कुरेहतु॥४५॥स्तनी
तिरस्यजननीप्राणोभ्योपिप्रियंसुतं॥उपगृहजहावाधितदंगस्पर्शनिर्वृता॥४६॥पयस्तना
भ्यांसुस्त्रावनेत्राभ्यांसलिलैःशिवैः॥तदाभिषिच्यमानाभ्यांवीरवीरस्तवोभङ्कुः॥५०॥ताशशा
सर्जनाराज्ञीदिष्ट्यातेपुत्रआतिदा॥प्रतिलब्धाचिरंनष्टोरक्षितामऊल्भवः॥५१॥अभ्यद्यतनत
गानूनंभ्रावान्यागतातिदा॥यदनुध्यायिनोधीरामसंसुनिरुद्धःसुडुर्जयः॥५२॥लाल्यमानेन
वैरेवंप्रभवसप्रातरन्तरं॥आरोप्यकरणीहृष्टःस्तूयमानोविशांवरः॥५३॥तत्रतत्रापसद्धेमे
लेसन्मकरतोरणैः॥सद्धेदैःकदलीस्तम्भैःपूगपोतैश्चतद्विधैः॥५४॥चूतपल्लववासःस्रग्मु
क्तादामविलंबिभिः॥उपस्कृतंप्रतिद्वारमपांकुम्भैःसदीपकैः॥५५॥प्राकारैर्गोपुरागारैःशात
कुम्भपरिच्छदैः॥सर्वतोलंकृतंश्रीमद्विमानशिखरद्युभिः॥५६॥

उपस्कृतंप्रतिद्वारमितस्ततरेणान्वयः॥५४॥चूतपल्लवाश्चवासांसिचस्रजश्चमुक्तादामानिचतेषांवि
शिष्टंलंवनमस्तियेषु॥५५॥गोपुराश्चागारश्च॥शातकुम्भाःपरिच्छदाःपरिकरायेषुविमा॥५६॥नाना

॥५२॥ सिद्धिप्रियस्तोत्रवृत्ति

भा॰ च॰ राद्योयस्मिन्॥५७॥ श्वेतसर्षपैः॥ अक्षताः रवाः॥५८॥ उपजह्रुः विकरन्त्यस्ततः सतः॥५९॥ पत्र भवनो

५८

चत्वरंगगांरथ्याः महामार्गाः॥ अट्टउच्चस्थोपरिनिर्मिताभूमिका॥ मार्गोवांतरः मध्ये संमार्जिताः स्वला

मध्ये चत्वररथ्याट्टमार्गं चंदनचर्चितं॥ लाजाक्षतैः पुष्पफलैः तंडुलैर्बलिभिर्युतं॥५७॥ ध्रुवाय प
थिदृष्टायतत्रतत्रपुरस्त्रियः॥ सिद्धार्थाक्षतदध्यंबुदूर्वापुष्पफलानि च॥५८॥ उपजह्रुः प्रयुंजाना
वात्सल्यादाशिषः सतीः॥ शृण्वंस्तद्वल्गुगीतानि प्राविशद्भवनं पितुः॥५९॥ महामणिव्रातमये
स तस्मिन्भवनोत्तमे॥ लालितो नितरां पित्रा न्यवसद्दिवि देववत्॥६०॥ पयःफेननिभाः शय्या दां
तारुक्मपरिच्छदाः॥ आसनानि महार्हाणि यत्र रौक्मा उपस्कराः॥६१॥ यत्र स्फटिककुड्येषु महा
मारकतेषु च॥ मणिप्रदीपा आभांति ललनारत्नसंयुताः॥६२॥ उद्यानानि च रम्याणि विचित्रैर
मरद्रुमैः॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः॥६३॥ वाप्यो वैडूर्यसोपानाः पद्मोत्पलकुमु
द्वतीः॥ हंसकारंडवकुलैर्जुष्टाश्चक्राह्वसारसैः॥६४॥ उत्तानपादो राजर्षिः प्रभावं तनयस्य तं॥
श्रुत्वा दृष्ट्वाद्भुततमं प्रपेदे विस्मयं परं॥६५॥ वीक्ष्योढवयसं तं च प्रकृतीनां च संमतं॥ अनुरक्तप्र
जं राजा ध्रुवं चक्रे भुवः पतिं॥६६॥ आत्मानं च प्रवयसमाकलय्य विशांपतिः॥ वनं विरक्तः प्रा

तमे॥६१॥६२॥ क्रमकसदंपश्चादिमस्योवाप्यः॥६३॥६४॥ ऊढवयसं प्राप्तयौवनं अनुरक्ताः प्रजा
यस्मिन्॥६६॥ प्रवयसं वृद्धम्॥६७॥ इति भावार्थदीपिकायां चतुर्थस्कंधे नवमोध्यायः॥

दृश्यमेभ्रातरं हंतुगां यत्नाणामकरोद्भुवं ॥ एकएवालकां गत्वेतस्यविक्रमउच्यते ॥ योषितां रत्नमिवा
तिमनोहरं कस्मात्त्वं चेतिवा ॥ २ ॥ यत्तेणाट्टो हिमवति हतः ॥ आज्ञावितिपांडुपुत्रे ॥ अस्मागतिगता
स्तेनसर्वः ॥ ३ ॥ कोणामर्षशुचाह्वैकांतेनापितोव्यासः ॥ जैत्रं जयहेतवे ॥ पुण्यजनालयमलकां ॥ ४ ॥

मैत्रेय उवाच ॥ प्रजापते ईदृतं शिशुमारस्य वैभव ॥ ऊर्ध्वे मे भ्रमितानाम तत्स्त्तौकल्पवत्सरै
॥ १ ॥ इलानामपिभार्यायां वायोः पुत्रो महाबलः ॥ पुत्रमुत्कलनामानं योषिद्रत्नमजीजनत् ॥ २
उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा ॥ हतः पुण्यजनेनाद्रौ तन्मातास्य गतिं गता ॥ ३ ॥ ध्रु
वो भ्रातृवधं श्रुत्वा कोपामर्षशुचार्पितः ॥ जैत्रं स्यंदनमास्थाय गतः पुण्यजनालयं ॥ ४ ॥ गत्वो
दीचीं दिशं राजा रुद्रानुचरसेवितां ॥ ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसंकुलां ॥ ५ ॥ दध्मौ शंखं म
हाबाहुः खं दिशश्चानुनादयत् ॥ येनोद्विग्नदृशः तत्र उपदेव्योत्रसन्भृशं ॥ ६ ॥ ततो निष्क्रम्य ब
लिन उपदेवमहाभटाः ॥ असहंतस्तं निनादमभिपेतुरुदायुधाः ॥ ७ ॥ स तानापततो वीर उग्रधन्वा
महारथः ॥ एकैकं युगपत्सर्वान् हत्वा बाणैस्त्रिभिस्त्रिभिः ॥ ८ ॥ ते वै ललाटलग्नैस्तैरिषुभिः सर्व एव
हि ॥ मत्वा निरस्तमात्मानमाशंसन्कर्म तस्य तत् ॥ ९ ॥

रुद्रानुचराभूतादयः ॥ दध्मौ वादितवान् ॥ येन शंखवादेन ॥ हे तत ॥ उपदेव्यो यक्षस्त्रियः ॥ ६ ॥ ७ ॥ ८
कैकं त्रिभिः त्रिभिरित्येवं सर्वान् युगपदर्शयुक्तानि यक्षान्युगपद्धन्जघान ॥ ८ ॥ ९ ॥ ॥

भा॰चे॰
८२

तेपि ततक्रमोः सहमाना अमुम विष्णव द्विगुणं यथा भवत्येवं षड्भिः प्रतिकर्तुं मिच्छन्तः ॥८॥ चित्रवाजैर्विवि
व्यधेः ॥११॥१२॥ धारामेपातेनच्छयोगिति रिवनैवादृश्यत ॥१३॥ स्वर्षे स्वयन्तल्यः ॥१४॥ यातुधानेषु एव

तेपि चामुमसृष्टेतः पादस्पर्शमिवोरगाः ॥ शौरे विष्णुस्तु गणपद्विगुणाय चिकीर्षवः ॥११॥ ततः परि
वनिस्त्रिंशैः शासमूलपरश्वधैः ॥ शातरुष्टिभिर्भुशुण्डीभिः चित्रवाजैः शौरेगपि ॥ अथ वर्षन्त्यक्त पिताः
मरथं सहस्रारथिं ॥ इच्छन्त स्तत्प्रतिकर्तुं मम प्रतानात्रयोदश ॥१२॥ औत्तानपादिः सतदाशस्त्रवर्षे
णाम्भूरिणा ॥ नेदृश्यतच्छन्नआसारेण यथा गिरिः ॥१३॥ हाहाकारस्तदेवासीत्सिद्धानां दि
वि पश्यतां ॥ हतोयं मानवः सूर्यो मग्नः पुण्यजनार्णवे ॥१४॥ नदत्सु यातुधानेषु जयकाशिष्वथो
मृधे ॥ उदतिष्ठद्रथस्तस्य नीहारादिव भास्करः ॥१५॥ धनुर्विस्फूर्जयन्दिव्यं द्विषतां खेदमुद्वहन् ॥
अस्त्रौघं व्यधमद्बाणैर्घनानीकमिवानिलः ॥१६॥ तस्य ते चापनिर्मुक्ता भित्वा वर्माणि रक्षसां ॥ का
यानाविविशुस्तिग्मा गिरीनशनयो यथा ॥१७॥ भल्लैः संछिद्यमानानां शिरोभिश्चारुकुण्डलैः ॥ ऊ
रुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः ॥१८॥ हारकेयूरमुकुटैरुष्णीषैश्च महाधनैः ॥ आस्तृतास्ता
रणक्षोण्यो भवौरञ्जवीरमनोहराः ॥१९॥ हतावशिष्टा इतरे रणाजिराद्रक्षोगणाः क्षत्रियवर्यसाय

नेषु जयकाशिषु जितंजितमिति जयप्रकाशकेषु सत्सु ॥१५॥ अथ मत्से चूर्णायामास ॥१६॥ वर्माणीक

रणाजिरात् २

८२

आततायिनं शस्त्रपाणिं ॥११॥ इति ब्रुवन्निस्त्रापिनमायिनामित्यादेरन्वयः ॥ चित्ररथो ध्रुवः यतः या
त्वा स्मृतियोगः पुनरुद्योगः तस्माच्छंकितः नभस्वतो वायोर्हेतोः ॥१२॥ विस्फुरंत्यः तडितो यस्मिन्
तेन त्रासयंतः स्तनयित्नवोऽशनयो यस्मिन् ॥१३॥ ववृषु निपेतुरित्यर्थः ॥ नसज्जति ॥ शरीरमिस स्वति

ध्रुवः २

अपश्यमानः स तदाततायिनं महामृधे कंचन मानवोत्तमः ॥ पुरीं दिदृक्षन्नपि नाविशद्द्विषां नमा
यिनां वेद चिकीर्षितं जनः ॥१४॥ इति ब्रुवंश्चित्ररथः स्वसारथिं यत्तः परेषां प्रतियोगशंकितः ॥ शु
श्राव शब्दं जलधेरिवेरितं नभस्वतो दिक्षु रजोन्वदृश्यत ॥१५॥ क्षणेनाच्छादितं व्योम घनानीके
न सर्वतः ॥ विस्फुरत्तडिता दिक्षु त्रासयत्स्तनयित्नुना ॥१६॥ ववृषू रुधिरौघासृक्पूयविण्मूत्र
मेदसः ॥ निपेतुर्गगनादस्य कबंधान्यग्रतोऽनघ ॥१७॥ ततः खेऽदृश्यत गिरिर्निपेतुः सर्वतो दिशः
गदापरिघनिस्त्रिंशमुशलाः साश्मवर्षिणः ॥१८॥ अहयोऽशनिनिःश्वासा वमंतोऽग्निं रुषाक्षिभिः ॥
अभ्यधावन्गजा मत्ताः सिंहव्याघ्राश्च यूथशः ॥१९॥ समुद्र ऊर्मिभिर्भीमः प्लावयन्सर्वतो भुवं ॥
आससाद महाह्रादः कल्पांत इव भीषणः ॥२०॥ एवंविधान्यनेकानि त्रासनान्यमनस्विनां ॥ स
सृजुः तिग्मगतय आसुर्या माययाऽसुराः ॥२१

तिश्लेष्मादि मेदसः पूर्वं त्वमार्थ मेदांसि ॥ अस्याग्रतो
निपेतुः ॥१७॥ साश्मवर्षिणः अश्मसहितं तु यद्वर्षं तद्वंतः ॥१८॥ अशनिवन्निःश्वासो येषां ॥१९॥ त्रासनानि
भयंकराणि तिग्मा क्रूरा गतिः प्रवृत्तिर्येषां ॥ असुरा राक्षसा दिशो देवहृदां नरत्वेन पत्नाप वोच्यते ॥२१

भा॰ च॰
५२

तस्य शेकल्याणी स्वाशंसन्नार्थितवंतः ॥ ४४ ॥ तव विपत्तानृशव्रत्राशयत ॥ अस्मात्पात ॥ अंजसा मरुवैनेव मस्तं
तथेति ॥ इति चतुर्थे दशमः ॥ १० ॥ एकाक्षौत्तपत्ताणान्वरपरह्नमरुः स्वयं ॥ आगत्य वायुर्यामासथ्रुवत्तनोप
देशातः एवंगदतो वचनमुपदेशं निशम्य रुपसृष्टरुपयत्र रापेणानिर्मितं नारायणाख्येतस्तस्य ध्वेत्लाके साया

प्रवेमुकामस्तैरेतामायामतिदुस्तरां ॥ निशम्य तस्य मनयः शमाशंसन्समागताः ॥ ४५ ॥ मृत्यु
ञ्जयः ॥ ओं तानवादेमगवांस्त्वयशाङ्कंधवादेवः तणात्वनतानिर्ह्योविपत्तान् ॥ यत्रामयेयम
भिधायनिशम्य वाह्मलोकोजसात्तरतिदुस्तरं सागरं ॥ इ ॥ इति चतुर्थे दशमः ॥ १ ॥ मैत्रेयउ
वाच ॥ निशम्य गदतामेवमृषीणां धनुषि ध्रुवः ॥ संदधे स्वमुपस्पृश्य यन्नारायणनिर्मितं ॥ १ ॥
संधीयमान एतस्मिन्माया गुह्यकनिर्मिताः ॥ क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा ॥ २ ॥ तस्या
र्षमस्त्रं धनुषि प्रयुंजतः सुवर्णपुंखाः कलहंसवाससः ॥ विनिःसृता आविविशुर्द्विषद्बलं यथा व
नं भीमरवाः शिखंडिनः ॥ ३ ॥ तैस्तिग्मधारैः प्रधने शिलीमुखैरितस्ततः पुण्यजना उपद्रुताः ॥ तम
भ्यधावन्कुपिता उदायुधाः सुपर्णमुन्नद्धफणा इवाहयः ॥ ४ ॥ स तान्पृषत्कैरभिधावतो मृधे निकृ
त्तबाहूरुशिरोधरोदरान् ॥ निनाय लोकं परमर्कमण्डलं व्रजंति निर्भिद्य यमूर्ध्वरेतसः ॥ ५ ॥ तान्हन्य
मानानभिवीक्ष्य गुह्यकाननागसश्चित्ररथेन भूरिशः ॥ औत्तानपादिं कृपया पितामहो मनुर्जगा

द्योयथा ॥ ५ ॥ किंचतस्यार्षास्त्रं स्पृषेः नारायणाद्भुतमस्त्रं प्रयुंजतः संदधतः सतः सुवर्णमयपुंखाः म
लमांतायेषां कलहंससमानं वासो सिपत्ता येषां ते स [illegible] परिशेषात ॥ ३ ॥ शिलीमुखेश

… ॥ ५८ ॥

५२

तमसो नरकस्य द्वारेणायेन रोषेण ॥ ७८ ॥ नन्वमद्यात्तदहं तावः कथमकृतैतेन मोः तत्राह ॥ नत्विति ॥ ८ ॥ म
त्यपि परायेत दुश्चिंतनं भवतीत्याह ॥ नायमिति ॥ पराग्भूत्यपराभूते देहमात्मानं गृहीत्वा पशवो यथा ॥ देहा
भिमानाद्यो मन्नेतितथा भूतानां वशमेहिं सेतियत ॥ ८ ॥ तच्च वाल्ये साधुः सत्विदानीं कथमन्यथा कृत

मनुरुवाच ॥ अलं वत्सातिरोषेण तमोद्वारेण पाप्मना ॥ येन पुण्यजनानेतानवधीस्त्वमनागसः ॥ ७ ॥
नास्मत्कुलोचितं तात कर्मैतत्सद्विगर्हितं ॥ वधो यदुपदेवानामारब्धस्तेकृतैनसां ॥ ८ ॥ नन्वेकस्यापि
रोषेण तत्संगादहवाहता ॥ भ्रातर्वधाभितप्तेन त्वयोग्भ्रातृवत्सल ॥ ८ ॥ नायं मार्गो हि साधूनां हृषी
केशानुवर्तिनां ॥ यदात्मानं पराग्गृह्य पशुवद्भूतवैशसं ॥ १० ॥ सर्वभूतात्मभावेन भूतावासं हरिं भवा
न् ॥ आराध्याप दुराराध्यं विष्णोस्तत्परमं पदं ॥ ११ ॥ मन्वे हरेरनुध्यातस्त्वमेषामपि संमतः ॥ कथं
त्ववंकृतवानद्य शिवं न मतात्वतं ॥ ११ ॥ तितिक्षया करुणया मैत्र्याचाखिलजंतुषु ॥ समत्वेन च स
र्वात्मा भगवान्संप्रसीदति ॥ १३ ॥ संप्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः ॥ विमुक्तो जीवनिर्मुक्तो ब्रह्मनि

वानित्याह ॥ सर्वभूतात्मभावेनेति द्वाभ्यां ॥ ११ ॥ अनुध्यातः हरेः हृदि स्थितः ज्ञातो वा तत्त्वं सोऽहरिः एषामानाम
पि साधुत्वेन संमतः ॥ १४ ॥ मत्तोवृतमेवाह ॥ महत्त्वमिति तितिक्षयादीनी चेषु करुणया समेषु मैत्र्या अखिलेषु जंत
समत्वेन च ॥ १३ ॥ ततः कृतार्थो भवतीत्याह ॥ संप्रसन्ने मतिगुणैर्विमुक्तः तएवतत्कार्येणाजीवेन लिंगश
रीरेण निर्मुक्तः सन्निर्वाणसुखात्मकं ब्रह्म आप्नोति ॥ १४ ॥ भै २

भ्रातरंत्वमंगीकृतोसि॥ इदानींतुनात्मनोभ्रातृत्वादिसंबंधः नवास्मोमहंतत्वादिक्रमपीत्याहदशभिः॥ भू
भा॰ च॰ ५३ तैःपंचभिरारब्धैर्देहाद्याकारेणपरिणतैर्योषित्पुरुषश्चेतिप्रसिद्धाः तयोर्व्यवायात्मैथुनात्संभूतिरन्ययो
र्योषित्पुरुषयोरिहसंसारेभवति॥१५॥एवंतावत्सर्गःप्रवर्ततेएवंपालककाकारपरिणतैर्भूतैरवस्थितिः॥
हंतृदेहकारपरिणतैःसंयमः॥सचपरमात्मनोमाययागुणानांव्यतिकरात्नतुस्वतः॥१६॥ननुजगतोनादे

भूतैःपंचभिरारब्धैर्योषित्पुरुषएवहि॥तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह॥१५॥एवंप्रवर्ततेस
र्गःस्थितिःसंयमएवच॥गुणव्यतिकराद्राजन्माययापरमात्मनः॥१६॥निमित्तमात्रंतत्रासीन्निर्गुणः
पुरुषर्षभः॥व्यक्ताव्यक्तमिदंविश्वंयत्रभ्रमतिलोहवत्॥१७॥सखल्विदंभगवान्कालशक्त्यागुणप्रवा
हेणविभक्तवीर्यः॥करोत्यकर्तैवनिहंत्यहंताचेष्टाविभूम्नःखलुदुर्विभाव्याः॥१८॥

हानांगुणानांवाकथंसर्गादिहेतुत्वंतत्राह॥ निमित्तमात्रंपुरुषर्षभःईश्वरः यत्रयस्मिन्निमित्तेसतिकार्य
कारणात्मकंविश्वंभ्रमतिपरिवर्तते॥यथायस्कांतेनिमित्तेसतिलोहंप्रवर्ततेतद्वत्॥१७॥ननुसर्वेनिमि
त्ततेहितस्याविशेषात्॥युगपदेवसर्गादित्रयंभवेदत्रआह सखल्विति॥कालशक्त्याक्रमेणगुणानांप्रवाहः
तेनभः॥तेनविभक्तसत्त्वादिविषयेवीर्यंशक्तिर्यस्य॥नतुकालोपिगुणानयुगपदेवतांप्रयतेतत्राह॥चेष्टा

ननु पित्रादिः सृजति पालयति राजादिः निर्हन्ति च चौरादिः न त्वीश्वरस्तत्राह सोनंतेति ॥ जनेन पित्रादिना
जनं पुत्रादिं सृजन् ॥ अनेनांतकं चौरादिकं तन्नस्तु हेतुना मारयन्नंतकः ॥ स एव तत्र अनंतो नादिः स्वव्ययः अ
क्षीणशक्तिः ॥ अयं भावः ॥ पित्रादयो यत् उत्पत्त्यादिं वितन्वंति न स्वातंत्र्येण कारणं किंत्वीश्वर एव तन्नियंता
सर्वकारणमिति ॥ १६ ॥ न चैवं कर्तृत्वेऽपि वैषम्यप्रसक्तिः ॥ पक्षपाताभावादित्याह द्वाभ्यां न वा इति स
मूर्तस्य समं यथा भवति तथा प्रजाः कर्मभूताः प्रविशतः तस्य साम्येऽपि भूतेषु फलवैषम्यं तत्कर्मणो

सोनंतोऽंतकरः कालोऽनादिरादिकृदव्ययः ॥ जनं जनेन जनयन्मारयन्मृत्युनांतकं ॥ १७ ॥ न वै
स्वपक्षोस्य विपक्षो वा परस्य मृत्योर्विशतः समं प्रजाः ॥ तं धावमानमनुधावंत्यनीशा यथा र
जांस्यनिलं भूतसंघाः ॥ १८ ॥ आयुषोऽपचयं जंतोस्तथैवोपचयं विभुः ॥ उभाभ्यां रहितः स्वस्थो दुः
स्थस्य विदधात्यसौ ॥ १९ ॥ केचित्कर्म वदंत्येनं स्वभावमपरे नृप ॥ एके कालं परे दैवं पुंसः काममु

तथाऽप्यत्वादितिसदृष्टांतमाह ॥ तं धावंतमनु अनीशाः कर्माधीना भूतसंघा धावंति ॥ अनिलं धावंतमनु रजां
सीव तत्र यथा रजांसि न तमः प्रकाशजलादिप्रवेशेऽपि नानिलस्य वैषम्यं ॥ एवमीश्वरस्यापीति भावः ॥ १८ ॥
अपचयमकालमृत्युं उपचयं कालमृत्योरपि रक्षां च यद्वापचयमशक्तादौ उपचयं देवादौ स्वच्छतां उपचया
पचयाभ्यां रहितोऽसौ विभुः दुःस्थस्य कर्माधीनस्य विदधातीति ॥ १९ ॥ एवंभूतस्येश्वरस्य मतकादिसमतः विवादः
स्तन्नाममात्रमित्याह केचिदिति ॥ पुंसः कामं वात्स्यायनादयः आतिष्ठ काममोक्षाधीनाः कामः करोति कामः क

टीपि ॥ ११ ॥

टीकाप्रकाशिका ॥ २२ ॥

भा० ख
५५

नानुकर्मादीनांजइत्यादिनास्वरूपतोपिभिन्नत्वात्कथमेकमसंतेतत्राह॥ अथवाकस्मातएवाप्रमेयस्यधर्यापिस
वेहेतुः॥ नानाशक्तीनोमहदादीनांमदयोपस्मात॥ चिकीर्षितमेवतावत॥ कोपिनवेदअयस्मसंभवो
यस्मातमीश्वरंकोवेदनकोपि॥ अहेतिपाठेसातात॥ अतस्तत्वज्ञानाभावाद्दिशेषांशेविवादइत्यर्थः॥
तथाचश्रुतिः॥ कोअद्धावेदकइहप्रवोचत्कुतः॥ आयाताकुतइयंविसृष्टिः॥ अर्वाग्देवाअस्यविसर्जनेने
नाकोवेदयतआवभूवइत्यादि॥२२॥ ईश्वरवादस्यमहत्तोपयोगमाहनेतेआत्मेहनारः॥ उत्तमेवदेतमत्र

अथतस्याप्रमेयस्यनानाशक्त्युदयस्यच॥ नैवेचिकीर्षितंतातकोवेदाथस्वसंभवं॥२३॥ नैवेते
पृथक्भ्रांतहेतारोथनदानुगाः॥ विसर्गोदानयोस्तात प्रभोदेवंहिकारणं॥२४॥ सएवविश्वस्य
न तिमेवावतिहंतिच॥ अथापिनहंकाराज्ज्यतेगुणकर्मभिः॥२५॥ एषभूतानिभूता
त्माभूतेशोभूतभावनः॥ स्वशक्त्यामाययायुक्तः सृजत्यत्तिचपातिच॥२६॥ तमेवमस्तममर
नतात देवसर्वात्मनोपेहिजगत्परायणं॥ यस्मैवलिंविश्वसृजोहरंतिगावोयथावेनसिदा

वदतिविसर्गोदानयोर्मत्वजन्मनोः॥ यद्वाविसर्गःसृष्टिःआदानंसंहारः दैवमीश्वरएवकारणं॥२४॥
तथापिनिर्लेपतामाहसएवेति॥२५॥ अनहंकारत्वेमाहएषइति॥२६॥ सत्यमीश्वरएवकर्तातथापिहेका
रादिमयास्मत्केशवंकंइतिचेत्तत्राहतमेवेतिचतुर्भिः॥ सत्वमभक्तानातमत्तमनुपेहिशरणंगच्छतमेवे
त्यवधारणेहेतुः॥ यस्मैनसिनासिकायांदामभिर्बद्धागावइवविश्वसृजोपिदामभियंत्रितावसंतोवा।

सर्वमेतिसि॥१९॥

लिंगंप्रतितत्लोकितंकर्मसंरुतीस्पष्टः॥१०॥

५५

तदा राज्यं नं चतत्वमैरेकरमेवेत्याह ॥ यः पंचवर्षः सत्तं यमाराध्य त्रिलोक्या मूर्द्धि पदं स्थानं लेभे लब्धवान
सि ॥ इदानीं तमेवाविच्छु अवलोकयेत्युत्तरेणान्वयः ॥ प्रसंचि श्रद्धाणि यस्मिन् कृपाविशेषणो वा ॥ २८
हरिं ध्यायेत सत्याह ॥ श्रुत्वा ध्रुवमनुक्तविरोधे आत्मनि मनसि अपाश्रितं अवस्थितमात्मरक्षसम्याहरिः
यः पंचवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा ॥ वनं गतः तपसा प्रत्यगक्षमाराध्य ले
भे मूर्द्धि पदं त्रिलोक्याः ॥ २८ ॥ तमेवमंगात्मनि मुक्तविग्रहे अपाश्रितं निर्गुणमेकमक्षरं ॥ आत्मान
सि मविच्छ्यविमत आत्मरक्षये त्रिरे भेदमसत्यतीयते ॥ २९ ॥ त्वं प्रत्यगात्मनि तदा भगवत्यनंत आन
त्वं दमात्र उपपत्र समस्तशक्तौ ॥ भक्तिं विधाय परमां शनकैरविद्याग्रन्थिं विभेत्स्यसि ममाहमिति
प्ररूढं ॥ ३० ॥ संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परं ॥ श्रुतेन भूयसा राजन्नगदेन यथामयं ॥ ३१ ॥ येनो
पसृष्टात्पुरुषात् लोक उद्विजते भृशं ॥ न बुधस्तद्वशं गच्छेदिच्छन्नभयमात्मनः ॥ ३२ ॥ हेलनं गिरिश
भ्रातुर्धनदस्य त्वया कृतं ॥ यज्जघ्निवान् पुण्यजनान् भ्रातृघ्नानित्यमर्षितः ॥ ३३ ॥ तं प्रसादय वत्साशु
सन्नत्या प्रश्रयोक्तिभिः ॥ न यावन्महतां तेजः कुलं नोऽभिभविष्यति ॥ ३४ ॥ एवं स्वायंभुवः पौत्रमनु
शास्य मनुर्ध्रुवम् ॥ तेनाभिवंदितः साकमृषिभिः स्वपुरं ययौ ॥ ३५ ॥ इति चतुर्थे एकादशः ॥ ११ ॥

मन ॥ अयं भेदो यस्मिन् तदिदं भेदभ्रमदेव विश्वं यस्मिन् प्रतीयते तं ॥ २९ ॥ तद्वेदनस्य फलमाह ॥ त्वं तदा
अनेषणाकालएव ॥ ३० ॥ उपदेशसारमाह संयच्छेति द्वाभ्यां ॥ प्रतीपं प्रतिकूलं श्रेयसो विरोधिनो ष येन यथा
रोगं नियच्छति ॥ ३१ ॥ येनरोषेणोपसृष्टात् आमात ॥ ३२ ॥ अस्मत्कुलनयाकार्यमित्याह हेलनमिति द्वाभ्यां

यपतः जत्रिवान ॥ ३३ ॥ इति चतुर्थे एकादशः ॥ ११ ॥

भा॰ च॰
८५

द्वादशेथनदेनाभिनंदितःपुरमागतः॥ यज्ञैरिष्ट्वाहरेःस्थानमारुरोहेतिकीर्त्यते॥ ॥ वैशसाद्वधान्निवृत्तंज्ञा
त्वा॥१॥ क्षत्रियदायादक्षत्रियपुत्र अत्यजःत्यक्तवानसि॥२॥ नचवैरस्यकारणमस्तीत्याह नभवानिति॥ अ
प्ययभावयोर्मृत्युजन्मनोः॥३॥ कथंतर्हि अहंहतोमयादिबुद्धिस्तत्राह अहंत्वमिति॥ आभातिप्रकाशतेस्वा

मैत्रेय उवाच॥ ध्रुवंनिवृत्तंप्रतिबुद्ध्यवैशसादपेतमन्युंभगवान्धनेश्वरः॥ तत्रागतश्चारणयक्षकि
न्नरैःसंस्तूयमानोभ्यवदत्कृतांजलिं॥१॥ धनद उवाच॥ भोभोःक्षत्रियदायादपरितुष्टोस्मितेनघ
यत्वंपितामहादेशाद्वैरंदुस्त्यजमत्यजः॥२॥ नभवानवधीद्यक्षान्नयक्षाभ्रातरंतव॥ कालएवहि
भूतानांप्रभुरप्ययभावयोः॥३॥ अहंत्वमित्यपार्थाधीरज्ञानात्पुरुषस्यहि॥ स्वाप्नीवाभात्यतद्ध्या
नाद्ययाबंधविपर्ययौ॥४॥ तद्गच्छध्रुवभद्रंतेभगवंतमधोक्षजं॥ सर्वभूतात्मभावेनसर्वभूता
त्मविग्रहं॥५॥ भजस्वभजनीयांघ्रिमभवायभवच्छिदं॥ युक्तंविरहितंशक्त्यागुणमय्यात्ममायया
॥६॥ वृणीहिकामंनृपयन्मनोगतंमत्तस्त्वमौत्तानपदेविशंकितः॥ वरंवरार्होंबुजनाभपादयो
रनंतरंत्वांवयमंगशुश्रुम॥७॥ मैत्रेय उवाच॥ सराजराजेनवरायचोदितोध्रुवोमहाभागवतोमहा
मतिर्हरौसवव्रेचलितांस्मृतिंययातरत्ययत्नेनदुरत्ययंतमः॥८॥

प्नेऽस्यार्थः॥ अतद्ध्यानात् देहानुसंधानात्॥ ययाधियाबंधःकर्मबंधःविपर्ययोदुःखादि॥४॥ ननुतस्मात्
गच्छगत्वाचभगवंतंभजस्वेत्यन्वयः॥ सर्वभूतात्मकोविग्रहोयस्य॥५॥६॥ कामंअभीष्टंनोचेत्तत्रअविशं
कितःनिर्भयः अनंतरंप्रतिनिकटे॥७॥ सवरायचोदितःइत्यनुवादरूपेणयद्वाक्यं॥ अतःसवव्रेइतितत्त

गाहस्यापीनहतत्वम॥ ८॥
८५

द्रव्यक्रियादेवतानां कर्मसाध्यं फलस्वरूपं कर्मफलप्रदं चेमर्थः ॥ १० ॥ सर्वस्यात्मनि स्वस्मै वै सर्वोपाधिविवर्जिते ॥ ११
११ ॥ अभोगैर्यज्ञायज्ञमानैः ॥ १२ ॥ वेदवर्त्मसु वायोगाः सर्वत्मगवोपस्मिस्तकाले त्रिवर्गसाधकं नीता ॥ अ

ततः प्रीतेन मनसा तोर्दवेश्वविक्तलतः ॥ पश्यतोः नष्टेयेमोपि स्वचरेतसम्यपयत ॥ १३ ॥ अथैवाप्ययन्नेतय
स्थेशङ्कतम्भिस्तरिष्यद्गिरौः ॥ द्रव्यक्रियादेवतानां कर्मैकसंप्रलसदं ॥ १७ ॥ सर्वात्मस्य स्तुतेः सर्वैती
र्थोर्यो भक्तिमद्दृहन ॥ द्रदर्शात्मनि भूतेषु तमेवावस्थितं विभुं ॥ ११ ॥ तमेवं शीलसंपन्नं ब्रह्मण्यं दी
नवत्सलं ॥ गोप्तारं समयसेतूनां मेनिरे पितरं प्रजाः ॥ १२ ॥ षट्त्रिंशद्वर्षसाहस्रं शशासक्षितिमंडलं
भोगैः पुण्यक्षयं कुर्वन्नभोगैरशुभक्षयम् ॥ १३ ॥ एवं बहुसंवकालं महात्माविचलेंद्रियः ॥ त्रिवर्गो
पयिकं नीत्वा पुत्रायादान्नृपासनं ॥ १४ ॥ मन्यमान इदं विश्वं मायारचितमात्मनि ॥ अविद्यारचित
स्वप्नगंधर्वनगरोपमं ॥ १५ ॥ आत्मस्थापत्यसुहृदो बलमृद्धकोशमंतःपुरं परिविहारभूश्च रम्याः
भूमंडलं जलधिमेखलमाकलय्य कालोपसृष्टमिति सम्प्रययौ विशालाम् ॥ १६ ॥

विव्हलानि संयतानीन्द्रियाणि यस्य ॥ १८ ॥ इदं देहादि भगवन्मायया आत्मनि स्वस्मिन् रचितं मन्यमा
नः ॥ अथ अविद्याद् इष्टिं दृष्टांतयति ॥ अविद्यारचितेति ॥ १५ ॥ आत्मदेहा आत्मादि मायिकं मपिस्वनं का
लेनोपसृष्टमनित्यमिस्याकलय्य विचिंत्य विशां वदितिकाश्रमं ॥ १९ ॥

भा॰ च॰
८९

ततस्तस्मिन्नष्टांगयोगमाह ॥ तस्मिन् शिवं वारुदकं विगाह्य प्रविश्येति स्नानादिनियमा उक्ताः विशुद्धकरण
इति शमादयो यमाः ॥ आसनादीनि स्फुटमेवोक्तानि जितो मरुत्प्राणो येन ॥ आहृतानि मनआदीनि येन ॥ भगव
तः प्रतिबिंबं तस्मिन् स्थूले विराड्रूपे एतन्मनो दधार ध्यायन् आत्मन्यवहितो ध्यातृध्येयभेदशून्यः समाधौ स्थितः
सन् तत् स्थूलं विसृजत् ॥ १ ॥ एवमजस्रं निरन्तरं हरौ भक्तिं प्रकर्षेण वहन् ॥ असौ ध्रुवो हरिस्मरणात् आत्मानं स्मा

तस्मिन् विशुद्धकरणः शिववार्विगाह्य बद्ध्वासनं जितमरुन्मनसाहृताक्षः ॥ स्थूले दधार भगवत्प्रति
रूप एतद्ध्यायंस्तदव्यवहितो व्यसृजत्समाधौ ॥ १७ ॥ भक्तिं हरौ भगवति प्रवहन्नजस्रमानन्दबाष्पकल
या मुहुरर्द्यमानः ॥ विक्लिद्यमानहृदयः पुलकाचिताङ्गो नात्मानमस्मरदसाविति मुक्तलिङ्गः ॥ १८
स ददर्श विमानाग्र्यं नभसोऽवतरद्ध्रुवः ॥ विभ्राजयद्दश दिशो राकापतिमिवोदितं ॥ १९ ॥ तत्रानु देव
प्रवरौ चतुर्भुजौ श्यामौ किशोरावरुणाम्बुजेक्षणौ ॥ स्थिताववष्टभ्य गदां सुवाससौ किरीटहारा
ङ्गदचारुकुण्डलौ ॥ २० ॥ विज्ञाय तावुत्तमगायकिङ्करावभ्युत्थितः साध्वसविस्मृतक्रमः ॥ ननाम
नामानि गृणन्मधुद्विषः पार्षत्प्रधानाविति संहताञ्जलिः ॥ २१ ॥

१ ॥ यतो मुक्तलिंगः त्यक्तशरीराभिमानः ॥ तत्र हेतवः ॥ आनंदबाष्पस्य कलया बिंदुना मुहुर्वारेणाभिभूयमा
नः ॥ विक्लिद्यमानं स्विद्यद्धृदयं यस्य पुलकैर्व्याप्तांगः ॥ १८ ॥ १९ ॥ अनन्तरं देवप्रवरौ ददर्श इत्यन्वयः ॥ ग
दामवष्टभ्य स्थितौ किरीटादिभिः सहितेन चारुणी कुंडले ययोः ॥ २० ॥ उत्तमगायः पुण्यश्लोकः तस्य किं
करौ तौ विज्ञाय मधुद्विषः पार्षदप्रधानाविति हेतोः ॥ साध्वसेन संभ्रमेण विस्मृतः पूजाक्रमः केवलं तत्

८९

२२ ॥ त्वमहं तत इति ॥ सशरीरस्यैव विष्णुपदारोहाभिप्रायं ॥ अतीतृपत तपिवान ॥ २३ ॥ आवां तस्य पार्षदौ ॥
२४ ॥ सुदुर्जयं तेहेतुः सूरयः सम्यग्योपि यत्परमाप्य केवलमधः स्थिताः पश्यंति ॥ यच्च चंद्रादयः प्रदक्षिणं
यथा भवति ॥ एवं परिक्रामंति ॥ तदातिष्ठ अधितिष्ठ ॥ २५ ॥ २६ ॥ आत्तुष्यत्रिस्य पिसशरीरस्यानामिप्राय

तं कृत्स्नपादाभिनिविष्टचेतसं बद्धांजलिं प्रश्रयनम्रकंधरं ॥ सुनंदनंदावुपसृत्य सस्मितं प्रत्यू
चतुः पुष्करनाभसंमतौ ॥ २२ ॥ सुनंदनंदावूचतुः ॥ भोभो राजन्सुभद्रं ते वाचं नोवहितः शृणु
यः पंचवर्षस्तपसा भवान्देवमतीतृपत ॥ २३ ॥ तस्याखिलजगद्धातुरावां देवस्य शार्ङ्गिणः ॥ पा
र्षदाविह संप्राप्तौ नेतुं त्वां भगवत्पदं ॥ २४ ॥ सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोप्राप्य विचक्षते
परं ॥ आतिष्ठ तच्चंद्रदिवाकरादयो ग्रहर्क्षताराः परियंति दक्षिणं ॥ २५ ॥ अनास्थितं ते पितृभिर
न्यैरप्यंग कर्हिचित ॥ आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदं ॥ २६ ॥ एतद्विमानप्रवरमुत्तमश्लो
कमौलिना ॥ उपस्थापितमायुष्मन्नधिरोढुं त्वमर्हसि ॥ २७ ॥ मैत्रेय उवाच ॥ निशम्य वैकुंठनियोज्य
मुख्ययोर्मधुच्युतां वाचमुरुक्रमप्रियः ॥ कृताभिषेकः कृतनित्यमंगलो मुनीन्प्रणम्याशिषम
८५ भ्यवादयत् ॥ २८ ॥ परीत्याभ्यर्च्य धिष्ण्याग्र्यं पार्षदावभिवंद्य च ॥ इयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्म
यं ॥ २९ ॥ तदोत्तानपदः पुत्रो ददर्शांतकमागतं ॥ गंधर्वमुख्याः प्रजगुः पेतुः कुसुमवृष्टयः ॥ ३६ ॥ ॥

मेव ॥ ३१ ॥ मधुच्युतमिति मधुच्युतं तां पादांते रेमधुच्युतं पस्यां तां ॥ अग्रतस्तां विशिमिस्मर्थः ॥ कृ

तं सितमकरकमिमंगलं वालं करांकेन च प्रदायतावचयामास ॥ २८ ॥ तेदेवऋषयं हिरासमं च
विश्मन्त्रसंग्रभवेपद्मैलत ॥ २९ ॥ ३ ॥

भा० च०
८०

दीनां हित्वा अग्नं द्रुगीमं त्रिविष्टपं यास्यामी सन्नु स्मरत्॥११॥ अवसितमभिप्रायं अवसीय ज्ञानात् देवयानेन
देवमार्गेण विमानेनेति वा॥१२॥१३॥ मुनीन् समर्षीनपि ततः परस्ताद्विष्णोः पदं तदभ्यगात्॥ ध्रुवो गतिर्य
स्य सः॥१४॥ यत् भ्राजमानं स्वरुचैव यत्र लोका विभ्राजंते येन न ग्रहा निष्कृपाः तेयत्र न व्रजं न गतवन्तः॥१५

सत्वस्थलोकमाभोदस्त्वन्नीति जनतीभवः॥ एवं स्मरं दुर्गं हित्वा दीनां यास्ये त्रिविष्टपं॥११॥ इति व्यव
सितं तस्य व्यवसीय स्वरोत्तमो॥ दर्शयामास तं देवी देवयानेन गच्छती॥१२॥ तत्र तत्र प्रशस्त सद्भिः पार्थिवै
र्मानिकैः स्वैः॥ अवकीर्यमाणो ददृशे क्रमस्थैः क्रमशो ग्रहान्॥१३॥ त्रिलोकीं देवयानेन सोतिव्रज्य
मुनीनपि॥ परस्ताद्यद्ध्रुवगतिर्विष्णोः पदमथाभ्यगात्॥१४॥ यद्भ्राजमानं स्वरुचैव सर्वतो लोका
त्रिलोचनं वीक्ष्य जाताश्चर्याः प्रणेमुः ...॥२४॥ तप्तहेमराशिसदृशकांतिं शितिर्नीलः कं
ठो यस्य तं॥२५॥२६॥ वेदिषदः बर्हिषदः चिकीर्षितं भगवदाराधनं विदितं॥२७॥ अनुग्रहकारणमाह
यः साक्षाद्वासुदेवं प्रपन्नः स हि मे प्रियः कथंभूतं रंहसः सूक्ष्मात्त्रिगुणात्प्रधानात् जीवसंज्ञिता ८६
त्॥ पुरुषाच्च परं प्रकृतिपुरुषयोर्नियंतारमित्यर्थः॥२८॥

तत्किं तस्य महत्तमत्वादित्याह ॥ स्वधर्मनिष्ठः पुमान्बहुभिः जन्मभिर्विरिंचतां प्राप्नोति ॥ ततो पुण्याति
शयेन मामेति ॥ भागवतस्तु अथ देहांते ॥ अव्याकृतं प्रपंचातीतं वैष्णवं पदमेति ॥ यथाहं इहस्थो भूतात्या
धिकारिवर्तमानः ॥ विबुधा देवास्त्वाधिकारिकाः कलात्यये ॥ अधिकारांते लिंगभंगे सति यांति ॥२९॥
अथ भागवता वासुदेवं प्रपन्ना यूयं मे प्रियाः स्थ भगवद्भिर्यथा मम प्रीतिः कार्यमाशयेनाह ॥ न मद्भा
गवतानां च प्रेयान्नास्ति ॥३०॥ अतः इदं जप्तव्यं श्रूयतामिति ॥ विविक्तं असंकीर्णं यथा भवति ॥३१॥

स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिंचितामेति ततः परं हि मां ॥ अव्याकृतं भागवतोथ
वैष्णवं पदं यथाहं विबुधाः कलात्यये ॥२९॥ अथ भागवता यूयं प्रियाः स्थ भगवान्यथा ॥ न मद्भा
गवतानां च प्रेयानन्योस्ति कर्हिचित् ॥३०॥ इदं विविक्तं जप्तव्यं पवित्रं मंगलं परं ॥ निःश्रेयसकरं
चापि श्रूयतां तद्वदामि वः ॥३१॥ मैत्रेय उवाच ॥ इत्यनुक्रोशहृदयो भगवानाह तान्छिवः ॥ बद्धां
जलीन्राजपुत्रान्नारायणपरो वचः ॥३२॥ रुद्र उवाच ॥ जितं ते आत्मविद्धुर्यस्वस्तये स्वस्तिरस्तु

स्तुष्यादौ स्वलाभमाह ॥ पुत्रेभ्यः प्रोक्तमिष्टदं स्तोत्रमाह ॥ प्रचेतोभ्यः कृपया भगवान् शिवः ते जितं त
वोत्कर्षः आत्मविद्धुर्याणां स्वस्तये शोभनसत्ताये स्वानंदलाभायेत्यर्थः ॥ अतो मे स्वस्तिः स्वानंदस
ताल्लक्षणमोक्षो ममस्त्वेवं किं न स्यात् ॥ तत्राह ॥ भवता राधसा स्वानंदरूपेणाराद्धं सिद्धं तत्पर
मानंदरूपेणौचनिसंस्थितः इत्यर्थः ॥ अत एवंभूतायात्मने तुभ्यं नमः सर्वस्मै सर्वरूपाय च २२

सर्वद्रूपत्वं प्रपंचयन्नाह्मनतिसार्द्धैर्दशभिः ॥ पंकजं लोकात्मकं नाभौ यस्य तस्मै कारणात्मने नमः का

भा०व० ८१ रणत्वे देवसूज्यानं श्रीमांनिनाये उपाधयः भूतानि नभआदीनि सूक्ष्माणि भूतानि तन्मात्राणि इंद्रिया

णि च तेषामात्मने नियंत्रे ॥ अंतःकरणचतुष्टयाधिष्ठातृत्वेन प्रणमति चतुर्भिः श्लोकार्द्धैः ॥ वासुदे

वाय चित्ताधिष्ठात्रे ॥ कूटस्थाय निर्विकाराय चित्तस्यैकरूपत्वात् ॥ २४ ॥ संकर्षणाय अहंकाराधिष्ठात्रे

सूक्ष्माय अव्यक्ताय ॥ अनंतायानंताय अंतकाय सम्वर्त्ताग्निना लोकदाहकाय विश्वस्य प्रकृष्टो बोधो य

नमः पंकजनाभाय भूतसूक्ष्मेंद्रियात्मने ॥ वासुदेवाय शांताय कूटस्थाय स्वरोचिषे ॥ २४ ॥
संकर्षणाय सूक्ष्माय दुरंतायांतकाय च ॥ नमो विश्वप्रबोधाय प्रद्युम्नायांतरात्मने ॥ २५ ॥
नमो नमोनिरुद्धाय हृषीकेशेंद्रियात्मने ॥ नमः परमहंसाय पूर्णाय निभृतात्मने ॥ २६ ॥
स्वर्गापवर्गद्वाराय नित्यं शुचिषदे नमः ॥ नमो हिरण्यवीर्याय चातुर्होत्राय तंतवे ॥ २७ ॥

स्मात् ॥ अंतरात्मने बुद्ध्यधिष्ठात्रे ॥ २५ ॥ हृषीकाणामिंद्रियाणामंशाय दिंद्रियं मनः तदात्मने सूर्यरूपे मी ८

ण प्रणमति ॥ परमहंसाय सूर्याय पूर्णाय तेजसा ॥ विश्वव्यापिने निभृतात्मने [illegible] ॥

२६ ॥ स्वर्गापवर्गद्वाराय च शुचिष्यंतःकरणेषु सीदतीति तस्मै ॥ हंसः शुचिषदिति श्रुतेः ॥ हिरण्य ८१

वीर्यं यस्य तस्मै अग्निरूपाय चातुर्होत्रं कर्म तेन तस्माय धनायेत्यर्थः ॥ तंतवे तद्विस्तारकाय ॥ २७ ॥

सोमत्वमाह॥ऊर्जेपितॄणाममृताय॥इषेदेवानाममृताय॥यज्ञरेतसेसोमाय॥सहिपितॄणांदेवानांचान्न
एवंरूपायत्रय्याःपतयेयद्रूपेणनमः॥सूर्याग्निसोमत्वेनैवतेजस्त्वमुक्त्वा॥जलत्वमेवाहसर्वरसात्मनेजल
रूपाय॥३८॥विशेषायपृथ्वीरूपाय॥सर्वेषांसत्वानांप्राणिनांयेआत्मनस्तेषांदेहायपृथ्वीयसेविराज
देहायच॥त्रैलोक्यपालायवायवे॥सहस्रादिरूपायसहस्राणांरूपेण॥त्रैलोक्यंपालयति॥सहस्रादिर्य

नमऊर्जेइषेत्रय्याःपतयेयज्ञरेतसे॥तृप्तिदायचजीवानांनमःसर्वरसात्मने॥३८॥सर्वभूता
त्मदेहायविशेषायस्थवीयसे॥नमस्त्रैलोक्यपालायसहओजोबलायच॥३९॥अर्थलिंगा
यनभसेनमोतर्बहिरात्मने॥नमःपुण्यायलोकायअमुष्मैभूरिवर्चसे॥४०॥प्रवृत्तायनिवृत्ताय
पितृदेवायकर्मणे॥नमोधर्मविपाकायमरायदुःखदायच॥४१॥नमस्तेआशिषामीशमन
वेकारणात्मने॥नमोधर्मायमहतेकृष्णायाकुंठमेधसे॥४२॥

मीयच॥३९॥नमस्तेआकाशाय
अर्थानांलिंगाय॥शब्दगुणत्वात्॥अंतर्बहिर्श्चवहारालंबनाय॥एवंमहाभूतरूपत्वमुक्त्वाअमुष्मैस्व
र्गायभूरिवर्चसे॥एषैवज्योतिष्मंतंपुण्यलोकंयातेतिश्रुतेः॥४०॥प्रवृत्तायनिवृत्तायकर्मणेपितृदे
वायपृथ्याकर्मपितृदेवप्राप्तिफलरूपायच॥अधर्मफलरूपायचमराय॥४१॥हेईशआशिषांकार
णात्मनेसर्वकर्मदात्रेमनवेसर्वज्ञायमंत्रात्मकायेतिवाविस्मृतेनप्रणमतिधर्मायपरमात्मनेकृष्णाय ९२

हृद्रूपेणाप्रणामति॥मीढुषेकृद्रायअहंकृतमहंकारं तदात्मने॥सर्वेकर्तृकरणकर्मशक्तित्रयसमेतस्त
स्मैव्रह्मलेनप्रणामति॥चेतिज्ञानेआकृतिःक्रियातद्रूपायवाचोविविधाभूतयस्यैप्रोत्तस्मै॥८३॥एवं
नमस्कृत्यदर्शनंप्रार्थयते॥दर्शनमितितवभिः॥भागवतैःसतकृतंदर्शनंदेहीत्यस्यविवरणंरूपंस्वपादि
प्रदर्शयस्व॥ह्यनामभक्तानांप्रियतमरूपंप्रदर्शयेतितवमनावयः॥सर्वेषांइन्द्रियाणांयेगुणाविषया॥

गुरुषायपुराणायसांख्ययोगेश्वरायच॥शक्तित्रयसमेतायमीढुषेहंकृतात्मने॥चेतिआकृति
रूपायनमोवाचोविभूतये॥८३॥दर्शनंनोदिदृक्षूणांदेहिभागवतार्चितं॥रूपंप्रियतमंस्वानांस
र्वेन्द्रियगुणाञ्जनं॥८४॥स्निग्धप्रावृड्घनश्यामंसर्वसौन्दर्यसंग्रहं॥चार्वायतचतुर्बाहुसुजात
रुचिराननं॥८५॥पद्मकोशपलाशाक्षंसुन्दरभ्रुसुनासिकं॥सुद्विजंसुकपोलास्यंसमकर्ण
विभूषणं॥८६॥प्रीतिप्रहसितापांगमलकैरुपशोभितं॥लसत्पंकजकिंजल्कदुकूलंमृष्टकुं
डलं॥८७॥स्फुरत्किरीटवलयहारनूपुरमेखलं॥शंखचक्रगदापद्ममालामण्युत्तमर्द्धिमत्॥८८॥

तेषामंजनंव्यंजकंसर्वेन्द्रियविषयरूपंरम्यं॥सर्वेन्द्रियाणांस्वगुणैरंजयतीतिवा॥८४॥स्निग्धःप्रा
वृषियोघनस्तद्वत्श्यामं॥सर्वेषांसौन्दर्याणांसंग्रहोयस्मिन्॥चारवःआयताश्चत्वारोवाहवोयस्मि
न्॥सुजातंयथोचितंसर्वावयवरुचिरमाननंयस्मिन्॥पद्मकोशस्यमध्येयानिपलाशानितद्वद्दि
णीयस्मिन्॥८५॥स्फुरंतिकिरीटादीनियस्मिन्॥उत्तमर्द्धिलक्ष्मीः॥घट्टापतेरुत्तमामर्द्धिःउत्कर्षोयस्या

सिंहस्कंधे परितः प्रसृतैः केसराग्रैर्विलिप्तः तादृशी सर्वतस्त्विषो विभ्रत्तामो भगग्रीवः कौस्तुभो यस्मिन्
यद्वा सिंहस्येव यो स्कंधे तत्पार्श्वस्त्विषः उत्कटाः आर्द्रीमि विभ्रदिति ह्य स्वि शेषणं सो भगवत्कुक्षा ग्रीवा येन
कौस्तुभो यस्मिन् ॥ श्रियो रेखाभूतया विलसितैः तिरस्कृतो निकषाश्मा स्वर्णरेखा विलसितो निकषपाषाणो येन ता
दृशेन रसाउलमहत्तशोभमाने ॥ ४४ ॥ एरे वेकाभ्यां स्त्रातो स्कंधाभ्यां भवितुं बाप्यवलीयावल यस्ता मिवेलव
लवरुस्थस्य पत्रसहशान्दूरयासिन्युत्तिसंक्रमयनयेता निर्गतविष्टतेनैव द्वारेण पुनः प्रवेशाय दिव ॥ ४५ ॥ श्रीण
मश्रोणा पिंकरोविलम्ब यस्मीतडकूलेन तवसर्वाणिमयी मेखला यस्मिन् श्रेष्ठी वजय चवऊरूव निम्रयन्मूर

सिंहस्कंधविषो विभ्रत्तौ भगग्रीवकौस्तुभं ॥ श्रियानपायिन्या विहितनिकषाश्मोरसोल्लसत
४४ ॥ एरेचुकसेविग्रवलिवलनुत्लोदरं ॥ प्रतिसंक्रामयदिश्वेनाभ्यावर्तगंभीरया ॥ ४५ ॥ श्यामश्रो
श्रोण्याधिरोविलसद्दुकूलसर्वाणिमेखलं ॥ समचार्वग्घ्रिजंघोरूनिम्नजानुसुदर्शने ॥ ४६ ॥ पद्माश
रत्स्वप्नपलाश रोचिषा नखद्युभिर्नोन्तरघं विधुन्वता ॥ प्रदर्शयंतं स्वमपास्तसाध्वसं पदद्वगोमा
गंगुह्यस्तमोज्वषां ॥ ४७ ॥ एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सता ॥ यद्भक्तियोगो भयदः स्वधर्म

तेजानुनी च समे सुन्दरे अभिस्थितैः शोभने दर्शने यस्य समसमाङ्ग्रा वोपस्थिते निम्ने जानुनी यस्मिन् शोभने दर्श
नेयस्येति पदवयवेवा ॥ ४६ ॥ पदादीयस्यानीयेन ॥ यद्वा पदंवभूतं तन पदोपलक्षितं तद्रूपं पदं शरणं प्रदर्शये
त्यर्थः ॥ शारदीयतस्य मतस्य पलाशं तद्वत्तत्तोचिर्येषां तेन नखदीप्तिभिः अंतर्भवमहत्त्वमज्ञानं विधुन्वता ।
सीघश्रूणे पदं दर्शयतां प्रदर्शय ॥ अपास्तं सहसा यस्मात्साध्वसं येन ततरहं गुहायतनं मेहवतमोज्वषामसतानां
प्रदर्शकोगुहः ॥ ४७ ॥ अतितुलं भमिदं मयापासाधितं तस्मिति स्तोतवाह ॥ एतद्रूपमनुध्येयध्यानादंमेवन

भा॰ च॰ ८९

नन्वेवं केनापि न प्राप्यते॥ तत्राह भवानिति॥ दुर्लभमतमेवाह स्वाराज्यं यस्य तस्याप्यभिमतः स्पृहणीयः
किं च॥ एकान्तेन य आत्मवित् तस्यापि गम्यः॥ ५४॥ अतस्त्वद्व्यतिरेकेण न किंचिदिच्छामीत्याह॥ तं त्वामेका
न्तभक्त्या आराध्य बहिः स्वर्गादि स्थलं वा॥ ५५॥ तत्र हेतुः यत्र पादमूले शरणं प्रविष्टं कृतान्तः कालो ममायं
वश्य इति वाभिमानं करोति किं कुर्वन् वीर्यं प्रभावः शौर्यमुत्साहः ताभ्यां विस्फूर्जितया उन्नमितया
भ्रुवा विश्वं विध्वंसयन्नपि॥ ५६॥ तत्पादमूलप्रविष्टसङ्गकृतान्तभयाभावः॥ कियानयल्लाभं तदेवा

भवान्भक्तिमता लभ्यो दुर्लभः सर्वदेहिनाम्॥ स्वाराज्यस्याप्यभिमत एकान्तेनात्मविद्गतिः॥ ५४
तं दुराराध्यमाराध्य सतामपि दुरापया॥ एकान्तभक्त्या को वाञ्छेत्पादमूलं विना बहिः॥ ५५॥ य
त्र निर्विष्टमरणं कृतान्तो नाभिमन्यते॥ विश्वं विध्वंसयन्वीर्यशौर्यविस्फूर्जितभ्रुवा॥ ५६॥ क्ष
णार्द्धेनापि तुलये न स्वर्गं नापुनर्भवम्॥ भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः॥ ५७॥ अ
थानघाङ्घ्रेस्तव कीर्तितीर्थयोरन्तर्बहिःस्नानविधूतपाप्मनाम्॥ भूतेष्वनुक्रोशसुसत्त्वशी
लिनां स्यात्सङ्गमोऽनुग्रह एष नस्तव॥ ५८॥

ह॥ तद्भक्तसंगस्य क्षणलवस्य हर्षार्थ्यं श्रेणिशिरसि न
रीनतीमाह॥ क्षणार्द्धेनेति॥ भगवत्सङ्गिनां सङ्गस्य लवस्य क्षणार्द्धेनापि स्वर्गं न तुलये समं न ग
णयामि॥ न चापुनर्भवं मोक्षं मर्त्यानामाशिषो राज्याद्याः किमुत॥ ५७॥ अथ हेतो अतो हेतोः अन
घाङ्घ्रेस्तव कीर्तिर्यशः॥ तीर्थं गङ्गा तयोः क्रमेणान्तर्बहिः स्नानाभ्यां विधूतं पा
पं येषां तेषां॥ अत एव भूतेष्वनुक्रोशः कृपा सुसत्त्वं रागाद्यरहितं चित्तं शीलं चार्जवादि विद्य

नतत्त्वज्ञानं च तद्भक्तसंगाद्देव भवतीत्याह ॥ न यस्येति ॥ येषां मतां भक्तियोगेनानुग्रहीतं शुद्धं यस्य चित्तं
बाह्यार्थविदितं न तु भविष्यति ॥ तमोरूपायां च नाविशत लयेन प्राप्त तत्र तदा सम्वित् निस्त्रवगातित तं प
श्यति ॥ ५८ ॥ कीदृशं तत्त्वं तत्राह यत्रेति ॥ ६० ॥ जगत उपादानत्वेन तत्त्वे लीनं ततो निमित्तत्वेनापि तदेव ल
क्षयन्नाह ॥ यो माययेदमिति ॥ इदं विश्वं सदिव परमार्थमिवासृजत ॥ कथंभूतया यया भेदबुद्धिर

न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत ॥ यद्भक्तियोगानुगृहीतमंजसा
मुनिर्विचष्टे ननु तत्र ते गतिं ॥ ५९ ॥ यत्रेदमव्यज्यते विश्वं विश्वस्मिन्नवभाति यत ॥ तत्त्वं ब्रह्म पर
ज्योतिराकाशमिव विस्तृतं ॥ ६० ॥ यो माययेदं पुरुरूपयासृजद्बिभर्ति भूयः क्षपयत्यविक्रियः
यद्भेदबुद्धिः सदिवात्मदुःस्थया तमात्मतंत्रं भगवन्प्रतीमहि ॥ ६१ ॥ क्रियाकलापैरिदमेव योगि
नः श्रद्धान्विताः साधु यजंति सिद्धये ॥ भूतेन्द्रियान्तःकरणोपलक्षितं वेदे च तंत्रे च त एव कोवि

येषां भवति तया आत्मनि तत्पितुः स्थया स्वकार्यकर्तृत्वसमर्थया तं त्वा ॥ निरस्तभेदं प्रतीमहि जानीम
ह ॥ यद्यपि चित्तमेवं निर्भेदं केवलं तथापि मार्गत्रं साकारं तद्रूपं यदेव यजंति त एव वेदागमतत्त्वज्ञा इत्या
ह ॥ क्रियाकलापैः यत् कर्मयोगिनः पूजयंति ॥ त एव कोविदा न त्वेतद्व्यतिरिक्ता ये केवलज्ञाने प्रवृत्ताः ॥
तत्रेत्यागमेकरूपं भूतमिदं भूतेन्द्रियान्तःकरणैरहं तैर्यद् उपलक्ष्यते निर्यत्स्वरूपं तत् ॥ ६२ ॥

भा॰च॰ ९

नन्वभिन्नेमप्यभेदंकुर्वतः संतोनकोविदावद्दितैर्भेदः क्रियतेनन्वेवमीश्वरचेतनाचेतनात्मकोभेदःकु
तस्माह॥ त्वमिति॥ आद्यस्त्वमेकमेवस्वमायाव्याशक्तिर्यस्य॥ पश्चात्तयाशक्त्यारजःसत्वतमसोर्द्दे
कं॥ यतोरजआदेःमहानहंकारः॥ खंचमरुदग्निर्वार्धराः॥ उदकंपृथ्वीच॥ सुरास्त्रऋषयश्चभूतगणा
श्चएवमिदंजगद्यतोभवति॥ तदभिधियत्नस्मनयः॥ ८२॥ एतदुपपादयतिसृष्टमिति॥ जरायुजांडजस्वे
दजोद्भिज्जरूपेणचतुर्विधंस्वांशेनप्रविष्टु॥ अथोरतिहेतोः पुरस्रोतः सततमंशविदाभासपुरिशयना

नमेकमाद्यंपुरुषंस्वमशक्तिंतयारजःसत्वतमोविभिद्यते॥ महानहंखंमरुदग्निवार्धराः
सुर्षयोभूतगणाइदंयतः॥ ८२॥ सृष्टंस्वशक्त्येदमनुप्रविष्टश्चतुर्विधंपुरमात्मांशकेन
अथोविदुस्तंपुरुषंसंतमस्तर्भुंक्तेहृषीकेर्मधुसारघंयः॥ ८४॥ सएषलोकानतिचंडवे ॥ ध ॥
गोविकर्षसितंबलकालयानः॥ भूतानिभूतैरनुमेयतत्वोघनावलीर्वायुरिवाविषह्यः॥

तरुषंविदुः॥ तद्विविमीश्वरमेवसंसारिणंविदुःनेत्याह॥ सएषामध्यमत्विकालाभिःसृष्टमधिवल ॥ ध ॥
लकंविषयसुखं॥ अविद्याहतःसनयोभुंक्तेतंजीवंविदुः॥ तथाचश्रुतिः॥ द्वासुपर्णासयुजासखा ह्री
यासमानंवृक्षंपरिषस्वजाते॥ तयोरन्यःपिप्पलंस्वाद्वत्यनश्नन्नन्योअभिचाकशीतीति॥ निर्गीतंचगुहा
प्रविष्टावात्मानौहितदर्शनादितिसूत्र॥ ८८॥ नवतुमंवनियंतः संसारत्स्याह॥ सएषशतकाद्देहस्थवान् ९०
सएषतंबलभूतेरव॥ भूतानिमेजयंतीर्वायुरिवकालयन्॥ विकर्षसित्रनुमेयतत्वःअलक्ष्यस्व

विकर्षणप्रकारमाह ॥ प्रमत्तमिति ॥ कृत्स्नमेवमेव सिद्धं कृतं त्वमिति चिन्तयोच्चैः प्रमत्तं ॥ तत्रहेतुर्विष
येषु लालसं अतिक्रान्तं कं मामेपि विषयेषु बहुलोभं ॥ प्रेतकरालमभिपत्य मे आक्रम्य मसितुपाले
लिहानः जिह्वयोष्ठप्रान्तौ स्पृशन् सर्पो मूषकमिव ॥ २६ ॥ अतः कस्त्वं पदाङ्घ्र्यजेयंडितश्चेत ॥ क
थंभूतः यत्न वा वमानो नादरस्तेन अपमानकेतनेशरीरे यस्य सः ॥ यदस्माके गुरुत्वं लाञ्छतिस्मे

प्रमत्तमुच्चैरितिकृत्स्नचिन्तया बहुलोभं विषयेषु लालसं ॥ त्वमप्रमत्तः सहसाभिपत्य मे
क्ष्वेलं लिहानोहिरिवाप्तुमैतकः ॥ २६ ॥ कस्त्वं पदाङ्घ्र्यविजहासि पंडितो यत्नेवमानस्यप
मानकेतनः ॥ विशोकयास्मद्गुरुरंचेति सर्वं यदुह्निनोपपतिमन्नन्तद्दश ॥ २७ ॥ अथ तत्समा
श्रितो ब्रह्मलस्य रमात्मन्विपश्चितो ॥ विश्वंहृद्भयप्रसन्नमजं तत्त्विद्ययागतिः ॥ २८ ॥ तद्देत व३
पतमर्हेदाविशुद्धान्तेपन्नरनाः ॥ स्वयमेमनुतिष्ठतो भगवत्संपिताशयाः ॥ २९ ॥ तमेवात्मा
नमात्मस्थ सर्वभूतेष्ववस्थितं ॥ ए जयद्धेरतानेतत्पश्यातपतश्चात्मसक्त इति ॥ ३० ॥ योगादे
शमुपासाद्य धारयन्तो मुनिव्रताः ॥ समाहितधियः सर्वं पतदभ्यसनाद्दता ॥ ३१ ॥

तिस्मरंवैघोस्तोतरणं वाक्यं विशोकया विनोपपतिश्रुतिरूढविद्याभ्यासेन मनवस्थाच्चेतिस्म ॥ २७ ॥ उपसं
हरति ॥ अथेति ॥ हृद्भयेन भवतं ॥ अतोनजन्तत्विद्वांयस्मात्तादृशीगतिरस्ति ॥ २८ ॥ योगादेशेन
मैतत्स्तोत्रमुपासाद्य पारतः ॥ प्राप्य मनसा धारयेति ॥ अभ्यासेन जप्यत ॥ ३१ ॥

विश्वसृजांपतिर्ब्रह्मा ॥७६॥ सिसृक्षुः स्रष्टुं इच्छुः ॥७७॥ अयुक्तकाग्रचित्तः ॥७८॥ ज्ञानमेव नौर्यस्य ॥७९॥ यो
अधीयानो भवति ॥८०॥ असत्वरं अक्षयाद्वैः ॥ असत्वरं अचिरेण सन् ॥ मद्गीतं स्तोत्रं तेन गीतात् ॥ एकश्च

इदमाह पुरास्माकं भगवान्विश्वसृक्पतिः ॥ भृग्वादीनामात्मजानां सिसृक्षुः संसिसृक्षतां ॥७६॥ ते
वयं नोदिताः सर्वे प्रजासर्गे प्रजेश्वराः ॥ अनेन ध्वस्ततमसः सिसृक्ष्मो विविधाः प्रजाः ॥७७॥ अथेदं
नित्यदा युक्तो जपन्नवहितः पुमान् ॥ अचिरात्छ्रेय आप्नोति वासुदेवपरायणः ॥७८॥ श्रेयसामि
ह सर्वेषां ज्ञानं निःश्रेयसं परं ॥ सुखं तरति दुष्पारं ज्ञाननौर्व्यसनार्णवं ॥७९॥ य इमं श्रद्धया युक्तो म
द्गीतं भगवत्स्तवं ॥ अधीयानो दुराराध्यं हरिमाराधयत्यसौ ॥८०॥ विंदते पुरुषोऽमुष्माद्यद्यदिच्छ
त्यसत्वरं ॥ मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात् ॥८१॥ इदं यः कल्य उत्थाय प्रांजलिः श्रद्धया
न्वितः ॥ शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबंधनैः ॥८२॥ गीतं मयेदं नरदेवनंदनाः परस्य पुंसः प
रमात्मनः स्तवं ॥ जपंत एकाग्रधियस्तपो महच्चरध्वमंते तत आप्स्यथेप्सितं ॥८३॥ इति श्री भा
भागवते चतुर्थे रुद्रगीतं नाम चतुर्विंशः ॥

वल्लभाः प्रियश्चाश्रयस्तस्मात् ॥८१॥ कल्ये उषसि ॥८२॥ तपश्चरतत पसो ऽते ईप्सितं प्राप्स्यथ ॥८३॥ ५९
इति भावार्थदीपिकायां श्रीभागवते चतुर्थस्कंधे चतुर्विंशोऽध्यायः ॥ २४ ॥

प्रचेतःसुतपस्यत्सु तत्रैव नारदोऽचूर्णी ॥ प्राचीनबर्हिषे आत्मतत्त्वं पाशेनेत्याह पंचभिः ॥१॥ पुरंजनकथाव्याजात्मे
चविंशे तु नारदः ॥ आत्मनो बुद्धिसंयोगेन विविधामाह संसृतिं ॥ प्रचेतःसुतपस्तीव्रं तप्यमानेषु नारदः ॥ पुरंजन
कथाकूटे प्राह प्राचीनबर्हिषे ॥१॥२॥ प्रचेतस्सु तपश्चरत्सु नारदः प्राचीनबर्हिषं बोधितवान् ॥ अतः प्रचेत

मैत्रेय उवाच ॥ इति संदिश्य भगवान्बार्हिषदैरभिपूजितः ॥ पश्यतां राजपुत्राणां तत्रैवांतर्दधे हरिः ॥१॥ रु
द्रगीतं भगवतः स्तोत्रं सर्वे प्रचेतसः ॥ जपंतस्ते तपस्तेपुर्वर्षाणामयुतं जले ॥२॥ प्राचीनबर्हिषं क्ष
त्तः कर्मस्वासक्तमानसं ॥ नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत् ॥३॥ श्रेयस्त्वं कतमद्राजन्क
र्मणात्मन ईहसे ॥ दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ॥४॥ राजोवाच ॥ न जानामि महाभा
ग परं कर्मापविद्धधीः ॥ ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः ॥५॥ गृहेषु कूटधर्मेषु पुत्रदारध
नार्थधीः ॥ न परं विंदते मूढो भ्राम्यन्संसारवर्त्मसु ॥६॥ नारद उवाच ॥ भो भोः प्रजापते राजन्पशून्
पश्य त्वयाध्वरे ॥ संज्ञापिताञ्जीवसंघान्निर्घृणेन सहस्रशः ॥७॥ ॥

तां कथामसमाप्यैव तत्पितरं तमाह ॥ प्राचीनबर्हिषमिति ॥३॥ श्रेयः फलं ईहसे ईहसि इच्छसि इह कर्म
णि तदुभयं नेष्यते विचारकैः ॥४॥ परं श्रेयः मोक्षः कर्मभिरपविद्धा विक्षिप्ता धीर्यस्य ॥५॥ किंच ॥ गृहेषु स्थि
तः पुत्रादिष्वेव पुरुषार्थधीर्यस्य ॥६॥ कर्मफलेषु वैराग्यमुत्पाद्य ब्रह्मविद्यामुपदेष्टुं योगानुभावेन यज्ञ
पशून्प्रत्यक्षं प्रदर्शयन्नाह ॥ भो भो इति संज्ञापिताम्मारितान् ॥७॥ ॥

भा॰ च॰
८२

एतेतांस्मे परेतं मत्तं संपरीतं ते वैशसं तत्कृतां पीडां स्मरंतः ॥ ततश्चायः कूटैर्लोहशृंगमयैः शृंगैः छिंदंति छेत्स्यंति ॥९॥ अत्र अस्मिन्संकटे निस्तारकममुमितिहासं कथयिष्यामि ॥१०॥ तत्रास्य विषयासक्तस्य संसारः स च स्वरूपग्रहणेन निवर्तते श्रुतिवक्तुं विपर्ययग्रहीतस्य स्मात्तात्पर्येण तं मशक्तो राजभूतांतमिवाह ॥ आसीदिति पुरंजनादीन् स्वयमेव ततः पंचमेऽध्याये व्याख्यास्यति ॥ तथापि स्वल्पं व्याख्यायते यथोपयोगं किंचिद्व्याख्या-स्यामः ॥ तत्र स्वकर्मभिः ॥ पुरं जनयतीति पुरंजनो जीवः ॥ न विज्ञातं नाम यस्य न च विज्ञातं चेष्टितं यस्य

एतेतां संप्रतीदं ते स्मरंतो वैशसं तव ॥ संपरेतमयः कूटैः छिंदंत्युच्छितमन्यवः ॥९॥ अत्र
ते कथयिष्येऽमुमितिहासं पुरातनं ॥ पुरंजनस्य चरितं निबोध गदतो मम ॥१०॥ आसीत्
पुरंजनो नाम राजा राजन् बृहच्छ्रवाः ॥ तस्याविज्ञातनामासीत्सखाविज्ञातचेष्टितः ॥११॥
सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः ॥ नानुरूपं यदाविंददभूत्स विमना इव ॥१२॥
न साधु मेने ताः सर्वाः भूतले यावतीः पुरः ॥ कामान्कामयमानोऽसौ तस्य तस्योपपत्तये

सखेश्वरस्तस्य सखा ॥ यद्वा ॥ विज्ञातं चेष्टितं जीवप्रेरणादिलक्षणं यस्य ॥ जीवपारतंत्र्यस्यानुभवसिद्धत्वात् ॥११॥ शरणं भोगायतनं देहं ॥१२॥ यावतीः पुरस्ताः ॥ तस्य तस्य कामोपपत्तये प्राप्तौ साधु न मेने ॥ गवादिदेहानामैहिकपारलौकिकभोगायोग्यत्वाभावात् ॥ तथा च श्रुतिः ॥ ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति ॥ १२ ॥ ८२

हिमवतोदक्षिणेषुसानुषुकर्मक्षेत्रेभारतवर्षे॥पुरंमनुष्यशरीरंलक्षितानिदृष्टानिसर्वाणिलक्षणानिय
स्मिंस्तथैवपंगुत्वादिदोषरहितामित्यर्थः॥१२॥तामनुवर्णयतित्रिभिः॥अत्रकिंचित्किंचित्सादृश्यमवलंब्यक
थासौंदर्यायप्राकारादीनिवर्णयति॥परितैरितिपुरुषमांसअस्थीनिगवाक्षानखादयःशरीरावयवाःप्र
कारादिपुरावयवत्वेनरूप्यंते॥स्वर्णादिशृंगैःशिखरैःपुंकायेगदहास्तैःसंकुलामितिआधारादिचक्राणि
गृहाःशृंगाणिचराजमार्गादिस्वभावविवक्षिताः॥१४॥नीलादिभिःक्लृप्ताहर्म्यस्थलीलयस्या॥अरुणोमणि

सएकदाहिमवतोदक्षिणेष्वथसानुषु॥ददर्शनवभिर्द्वार्भिःपुरंलक्षितलक्षणां॥१३॥प्राकारो
पवनाट्टालपरिखैरक्षतोरणैः॥स्वर्णरौप्यायसैःशृंगैःसंकुलांसर्वतोगृहैः॥१४॥नीलस्फटिकवै
डूर्यमुक्तामरकतारुणैः॥क्लृप्तहर्म्यस्थलींदीप्तांश्रियाभोगवतीमिव॥१५॥सभाचत्वररथ्या
भिराक्रीडायतनापणैः॥चैत्यध्वजपताकाभिर्युक्तांविद्रुमवेदिभिः॥१६॥

कांस्थलीहृदयं॥नागलोकोनीलादिभावेनरूप्यंतेतेनत्वावान्सतावाभोगवतीनागानांपुरीमिव॥१५॥सभासमा
जस्थानंचत्वरंचतुष्पथः रथ्याराजमार्गाः॥आक्रीडायतनंद्यूतादिस्थानं॥आपणोहट्टः॥चैत्यंजनानांवि
श्रामस्थानंध्वजेषुपताकाः ताभिर्युक्तां॥अत्रचविषयनिष्ठबुद्धियोगेनजीवस्यदेहसंबंधइतिविव
क्षितविषयवर्गवासोपवनत्वेनरूप्यतइतितद्विशेषान्स्रक्चंदनादीन्विद्रुमलताभावेनशेषंकथालं
कारः॥१६॥ ॥

वाटोपवने मम सा ददर्श इति वक्तव्ये नान्वयः ॥ तदन्तां विहंगालिकुलानां कोलाहलो येषु ते जलाशया यस्मि
न् ॥ १७ ॥ हिमनिर्झराणां विप्रुषो बिंदवः ॥ तद्वता कुसुमाकरसंबंधिना वायुना चलंतः प्रवालविटपाः शाखा
भा॰च॰ ९२ श्रयेषां तैर्वृक्षैर्नलिनानां तटेषु संपत्समृद्धिर्यस्मिन् ॥ १८ ॥ अनाबाधे तत्कृतबाधरहिते ॥ मुनिव्रतैः रहितैः स्वैः
आत्मानमाहूतं मन्यते यत्र ॥ १९ ॥ तत्र प्रमदोत्तमां विवेकवतीं बुद्धिं ददर्श ॥ यदृच्छयागतामिति तपोसंवेद्यउ

पुष्पोत्तमवाटोपवने दिव्यद्रुमलताकुले ॥ नदद्विहंगालिकुलकोलाहलजलाशये ॥ १७
हिमनिर्झरविप्रुष्मत्कुसुमाकरवायुना ॥ चलत्प्रवालविटपनलिनीतटसंपदि ॥ १८ ॥
नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः ॥ आहूतं मन्यते यत्र पान्थः कोकिलकूजितैः ॥ १९
यदृच्छयागतां तत्र ददर्श प्रमदोत्तमाम् ॥ भृत्यैर्दशभिरायान्तीमेकैकशतनायकैः ॥ २० ॥
पंचशीर्षाहिना गुप्तां प्रतीहारेण सर्वतः ॥ अन्वेषमाणामृषभमप्रौढां कामरूपिणीम् ॥ २१
सुनासां सुदतीं बालां सुकपोलां वराननाम् ॥ समविन्यस्तकर्णाभ्यां बिभ्रतीं कुण्डलश्रियम् ॥ २२

तिं रूपवतीं ददर्श यति ॥ तामनुवर्णयति सार्धैस्त्रिभिः ॥ दशभिर्ज्ञानकर्मेन्द्रियैः ॥ एकैकं प्रत्येकं शतं च नी
तागंधादिवृत्तयस्तासां नायकैः पतिभिः सह ॥ पाठान्तरे ॥ नायकाः स्त्रियो येषां तैः ॥ २० ॥ पंचशीर्षाणि प्राण
वृत्तयो यस्य तेनाहिना प्राणेन प्रतीहारेण पालकेन गुप्तां ॥ ऋषभं भर्तारं ॥ २१ ॥ गंधादिज्ञानानि दिभि ९३
बुद्ध्यवयवैः सुनासात्वादिरूप्यते ॥ समविन्यस्तयो रचितयोः कर्णयोस्ताभ्यां कुण्डलशोभां दधती ॥ २२ ॥

ग्रन्नमयं हि सोम्यमनः इति पतत्क मंतंदन स्पेसादिक्ष स्तनमारेणाशणामामिस्रुतं ॥ नूपुरैः क्वणाझंपादाभ्यां नू
पुरैरित्यंगुलीयकानामप्युलक्षणाद्द्वचनं ॥ २३ ॥ अजितकेशारं यौवनोपक्रमो याभ्यां समौ चवृत्तौ च ॥ २४
नामाहेति ॥ तयोः संवादोक्तेः सेवथदार्शायत्र्यणां गण वशुवीवामूलमतो यस्य कटाक्षस्य वानस्पतेन स्पृष्टो वि
द्रुः ॥ प्रेममाणाउच्चैः प्रेमतीभूः यत्र स्थानीयायस्मितं तेन ॥ २५ ॥ कृतः स्थानादिहागतासि हे सति पृथ्योः समीपस्था

पिशंगनीवीसत्रुओणी शणमां कनकमेखलां ॥ पद्भ्यां क्वणाझ्ना चलंतीं नूपुरैर्देवतामिव ॥ २७ ॥ म
नोयं जितकैशोरी समवृत्तौ नितंबरौ ॥ वहतीं तेन निगूढौ ती व्रीडया गजगामिनी ॥ २८ ॥ तामाहल
लितवीरः सन्नीउस्मितशोभना ॥ स्त्रियं नपाणापुत्रेन स्पृष्टः प्रेमाक्षमद्भवा ॥ २९ ॥ कातंकेजपला
शात्कि स्यासी दृक्कृतः सति ॥ रमामनपश्रीभीह किं विकीर्षसि शमने ॥ ३० ॥ कपते
एकादशमहाभटा ॥ पताश्च ललनामभक्तेः पतते हि पुरं मर ॥ ३१ ॥ तद्धीर्भवान्यस्य यवाग्रमाय
तिं विचिन्वतीं किं मनिवहद्वावने ॥ तं दक्षिकामामसमस्तकामकपद्मकोशः पतितः कराग्रात ॥ ३२

भूः तामालक्ष्य किं कर्तुमिच्छसी स्पृष्ठी ॥ ३३ ॥ तव ये व ययापस्वनुवर्तिनं पतेकैकादशो महाभटोद्धृ इवल
त्वेनवदामाणाय पुरुषामतेन वृद्धे मनः एथगुपादानं वृद्धिपरिचारकेऽपि ये महापतयातस्परिचारकत्वं वि
वक्षया ॥ ३४ ॥ तं ह्रीः किं पतिं यमं विचिन्वती ॥ अथवा भवानीपतिं शिवं विचिन्वतीं किं वा कसरस्वतीपतिं ब्र
ह्माणं किं रमापतिं विष्णुं निरिव समपतीमती ॥ कथंभूतं पतितं दक्षिकामैनैवतन्क्रतयातं दक्षिकामनये

॥ ५४ ॥

भा·वि·
९८

हेवरारोहस्त्वासांमध्येत्वमस्मतमापितभवतियतोभविस्मृकन्नहिदेवत्ताभवंस्पृशंति॥वीरवरेणमयानउ
त्तमकर्मांकथंत्वयामहालेकरोमीतिचेतत्राह॥अदभ्रकर्मणाअदभ्रमनल्पकर्मतत्संपाद्यंयस्यतेन
स्वतोकर्मतेनतत्संगात्सकामोभवामीत्यर्थः॥परंवैरंवैरंवैकुंठ॥५॥यद्यस्मादयोगेनविशिष्टेनविहंडि

नासांवरोर्थस्यतमाभविस्मृकपुरीमिमांवीरवरेणसाकं॥अर्हस्यलंकर्तुमद
भ्रकर्मणालोकंपरंश्रीरिवयत्तकुंभा॥५॥यदेषमायाविवृहितेह्रियंसश्रीउ
माविस्मितविभ्रमद्दृवा॥नपापदृष्टोभगवान्मनोभवःप्रवायतेयानुगृह्णाण
शोभने॥३॥तमाननेत्संभ्रुस्तारलोचनव्यालविनीलालकवृंदसंवृते॥उत्तीय
मेदर्शयवल्गुवाचकंयद्विरुपानाभिमतंविसुविस्मिते॥३॥

तमिद्रियंमनोयस्य।तेमनोभवोवायते॥अथतस्मादनुगृह्णासश्रीउं॥यद्भावेनप्रेमणास्मितंतेनविभ्रमं
तीभ्रूः यस्याएतादृशातयाउपसृष्टःप्रेरितः॥१॥यत्श्रीउयासंगत्वेनभवति॥तदाननमश्रीयमेदर्शाय ९८
शोभनेभ्रूःवोयस्मिन्स्तारेशोभनकनीनकलोचनेयस्मिन्॥व्यालविनोदीर्घोयेनीलाश्चलकाले
वाहृदेनसंवृत॥वल्गूनिवाचकानिवाक्यानियस्मिन्॥३॥

देवी रम्या पितं दृष्ट्वा मोहिता सती तमाह ॥ पत्न्युक्तं कस्यासीत्यनेन कस्य पुत्रो गोत्रजेति च ॥ किं नामासीति तत्राह
आत्मनो मम परस्य तवापि कर्त्तारं सम्यक् न विद्मः ॥ गोत्रं नाम च यत्कृतं भवति तेन कृतं विद्मः ॥ २८ ॥ आत्मनो म
म शरणमिदं पुरीयेन निर्मितां तं च न विद्मः ॥ २९ ॥ पत्न्युक्तं कृत्य तेन पृष्ट्वा इति तत्राह ॥ यत इति ॥ ३० ॥ आत्म
नाम गोत्रादि स्थितं दृष्ट्वा गतो हि मत्पत्नि दिष्ट्या तावद्दृष्टुं ग्राम्यान् उद्दिश्य ग्रामाहीन उद्वहिष्यामि संपादयिष्यामि

इत्थं पुरंजनं नारी याचमानमधीरवत् ॥ अभ्यनंदत तं वीरं हसंती वीरमोहिता ॥ २७ ॥ न विदाम वयं
सम्यक् कर्त्तारं पुरुषर्षभ ॥ आत्मनस्य परस्यापि गोत्रं नाम च यत्कृतं ॥ २८ ॥ इहाद्य संतमात्मानं वि
दाम न ततः परं ॥ येनेयं निर्मिता वीर पुरी शरणमात्मनः ॥ २९ ॥ एते सखायः सख्यो मे नरा नार्यश्च
मानद ॥ सुप्तायां मयि जागर्त्ति नागोऽयं पालयन् पुरीं ॥ ३१ ॥ दिष्ट्यागतोसि भद्रं ते ग्राम्यान्कामानभीप्स
से ॥ उद्वहिष्यामि तांस्तेहं स्वबंधुभिररिंदम ॥ ३२ ॥ इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो ॥ मयोपा
नीतान् गृह्णानः कामभोगान् शतं समाः ॥ ३४ ॥ कं नु त्वदन्यं रमये ह्यरतिज्ञमकोविदं ॥ असंपरायाभि
मुखं अश्वस्तनविदं पशुम् ॥ ३५ ॥

स्वबंधुभिः सखीभिश्च ॥ ३३ ॥ समाः संवत्सरान् मनुष्यरे
हात्वं वेशान् शतमित्युक्तं ॥ ३४ ॥ प्रवृत्ति स्वभावता निवृत्ति निंदा पूर्वकं तत्संगमपि निंदति पंचभिः ॥ ता
नीत्य रमये अरतिज्ञं नैष्ठिकं ॥ विषयसुखेषु नासक्तं ॥ अकोविदं अनिषिद्धस्वाद्यत्यागिनं संपरायो मरण
मित्यर्थः अभिमुखं परलोकचिंताशून्यं ॥ अश्वस्तनविदं च ॥ श्वः इदं कर्त्तव्यमिति लोकचिंताशून्यं पशुतुल्यम् ॥ ३६

अश्मारूढेष्वप्रजानंदाः॥पुत्रमहं त्वं श्रमतं तं मोदतः॥केवलिनो यतयः॥३९॥यद्धाश्रम इति यतद्देमां ईशरण
माश्रयेवं वदंति॥४०॥भोगिभोगयोः सर्पदेहाकारयोस्तत्त्वभुजयोर्यत्र सज्जेत॥एवंभूतेकस्याः स्त्रियः मनः
भा॰च॰ ९५ स्रातनकस्याश्रपियोभवान् अनाथवर्गाः दीनस्तोमस्तेषां आधिमलं अत्यर्थं अपाहितं सर्वत्र चरति

धर्मार्थकाम्याः कामौ च प्रजानंदो मज्जेयश्राः॥लोका विशोका विरजा यात्र केवलिनो विदुः॥३९॥
पितृदेवर्षिमर्त्यानां भूतानामात्मनस्त्वह॥देमेवं दंति शरणं भवे स्मिन्यद्गृहाश्रमः॥४०॥ काना
मवीर विख्यातवदान्य प्रियदर्शने॥ नहूणां नयतिं मामामादृशीनां दृशां स्वयं॥४१॥ कस्या मनस्ते
भुवि भोगिभोगयोः स्त्रियो न सज्जेद्भुजयोर्महाभुज॥ योनाथवर्गाधिमलं च घृणोद्धृतस्मितावलो
केन चरत्यपोहितं॥४२॥ नारद उवाच॥ इति तौ दंपती तत्र समुद्यसमयं मिथः॥ तां प्रविश्य पुरीं
राजन्मुमुदाते शतं समाः॥४३॥ उपगीयमानो ललितं तत्र तत्र च गायकैः॥ क्रीडन्परिवृतः स्त्री
भिर्हृदिनीमाविशच्छुचौ॥४४॥

केनापोहितं घृणयोद्धृतः॥ अतिशयितो यः स्मित एव कोपावलोकस्तेन॥४२॥ समुद्यसमुद्दीर्यसमाः
संवत्सरान्॥४३॥ तत्र जाग्रदवस्थायां तद्देवेणाह॥ उपगीयमान इति॥ स्वप्नावस्थामाह॥ हृदि ९५
नी हृदयाकाशे॥ स्नापयस्थाने॥ शुचौ निदाघे॥४४॥

द्वानीनवद्वारप्रदर्शनपूर्वकं जाग्रदवस्थां प्रपंचयति॥ समेतियावदध्यायसमाप्ति॥ तस्याः पुरउपरिकृता
द्वाराः सप्तपूर्वाइतिपादे॥ सप्तनूनानेत्रेनासिकेश्रोत्रेमुखंचेति॥ अधोद्वेद्वारेगुदलिंगे॥ पदंकथ्येति॥ आत्म
नःसम्यगविज्ञानादनियतत्वाच॥ ८५॥ तासुसप्तसुपंचद्वाराःपौरस्त्याः एवंद्विभवाः॥ ८६॥ खद्योतवदल्प
प्रकाशात्वामनेत्ररूपा॥ आविर्मुखतःसप्तविषयप्रामाव्यबहुप्रकाशदक्षिणलक्षणात्तस्माद्दक्षिणेअक्षेआत्म

सप्तोपरिकृताद्वाराःपुरस्तस्यास्तुदेहभृत्॥ पृथग्विषयगत्यर्थंतस्यांयःकश्चनेश्वरः॥ ८५॥
पंचद्वारस्तुपौरस्त्यादक्षिणैकातथोत्तरा॥ पश्चिमेद्वेअमूषांतेनामानिनृपवर्णये॥ ८६॥
खद्योताविर्मुखीचप्राग्द्वारावेकत्रनिर्मिते॥ विभ्राजितंजनपदंयातिताभ्यांद्युमत्सखः॥ ८७॥
नलिनीनालिनीचप्राग्द्वारावेकत्रनिर्मिते॥ अवधूतसखस्ताभ्यांविषयंयातिसौरभं॥ ८८॥
मुख्यानामपुरस्ताद्वास्तत्रापणबहूदनौ॥ विषयौयातिपुरराड्रसज्ञविपणान्वितः॥ ८९॥

नौवीर्यवत्तरत्वात्स्मृते॥ स्वानुभवाद्बहुतरप्रकाशाधिक्यं॥ एकत्रकंसंलग्नेविभ्राजितंरूपंद्युमत्सखःचक्षुःसहि
तः॥ ८७॥ नलनालशब्दौनाडिरूपौचिनोतेःतत्रनलिनीवामदक्षिणनासिकेअत्रापिसंज्ञाभेदादेवकार्यभेदनापि
कंरूपंवदतइतिपमं॥ अवधूतोवायुरधिष्ठितोघ्राणः॥ सौरभंगंधं॥ ८८॥ मुख्योमध्यमयानाआस्यंआपणोभाषणो
बहूदनस्त्रिप्रमानं॥ बहूदनसमवतिःपरोक्तवादनातरसज्ञंरसनेन्द्रियंविपणोवागिंद्रियंताभ्यामन्वितः॥ ८९

दक्षिणेनेति नन्तरीया किंतु दक्षिणस्यां दिशि यस्मिन्नर्थे॥ तद्वितीयमिति प्रत्ययोऽप्यसंज्ञः एवमन्तरेणो
भा॰ च॰ ति॥ अयमर्थः॥ पंचानां विषयाणामश्रमतो नवगतानां प्रकाशनायालमिदं पंचालं शास्त्रं श्रवणकाले चव
५६ लाधिकारदक्षिणकर्णः॥ प्रथमं प्रवर्तते शास्त्रे च प्रथमं श्रोतव्यमेकमेकांगुमित्येतावता साम्येन प्रवृत्तिसंज्ञ
स्यकमेकांगुस्य दक्षिणकर्णेन श्रवणमिष्यते तेन तत्स्वदर्थमनुष्ठाय पितृभिराहृतः॥ पितृलोकप्रापकं पि
तृयाने प्रपद्यते॥ तदनेन प्रकारेण पितॄणामाह्वानमनेन भवतीति पितृहूर्दक्षिणकर्णः॥ एवं तद्वैप

पितृहूर्नृप पुर्या द्वार्दक्षिणेन पुरंजनः॥ राष्ट्रं दक्षिणपंचालं याति श्रुतधरान्वितः॥५०॥
देवहूर्नाम पुर्या द्वा उत्तरेण पुरंजनः॥ राष्ट्रमुत्तरपंचालं याति श्रुतधरान्वितः॥५१॥
आसुरी नाम पश्चाद्द्वास्तया याति पुरंजनः॥ ग्रामकं नाम विषयं दुर्मदेन समन्वितः॥५२॥
निर्ऋतिर्नाम पश्चाद्द्वास्तया याति पुरंजनः॥ वैशसं नाम विषयं लुब्धकेन समन्वितः॥५३॥

रीत्येनोत्तरः कर्णो देवहूः॥ तथा च व्याख्यास्यति॥ पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः॥ प्रवृत्तं च नि
वृत्तं च शास्त्रं पंचालसंज्ञितं॥ पितृयानं देवयानं श्रोत्रात् श्रुतधराद्व्रजेदिति॥५१॥ असुराणामिंद्रियारामाणां
मासियमासुरी शिश्नद्वाः॥ ग्रामकं ग्राम्यजनानां स्वसुखव्यवायं दुर्मदेन गुह्येंद्रियेण॥५२॥ निर्ऋतिर्नाम गु ५६
दः सत्त्वहारत्वात्॥ वैशसं मलविसर्गं लुब्धकेन पायुना तेनोत्क्रांतः सद्गः खश्रमात्सः लुब्धकसाम्यम्॥५३

अमीषांमध्येनिर्वाक्पादःपेशस्कृतहस्तःतावुभावंधौछिद्राभावात्स्वतोज्ञानक्रियाशक्त्यभावाच्चय
न्तावेवंतावेंद्रियवंतोदेहानामधिपतिःपुरंजनःनविंद्रियमात्रमिति सर्वेषांतमोविनाशात॥५४॥अंतःपुरहृद

अंधावमीषांपौराणांनिर्वाक्पेशस्कृतावुभौ॥अत्रएवनामधिपतिःताभ्यांयातिकरोतिच॥५४॥स
यर्ह्यंतःपुरगतोविषूचीनसमन्वितः॥मोहंप्रसादंहर्षंवायातिजायात्मजोद्भवं॥५५॥एवंकर्मसुसं
सक्तःकामात्मावंचितोबुधः॥महिषीयद्यदीहेततत्तदेवान्ववर्तत॥५६॥क्वचित्पिबंत्यांपिबतिम
दिरांमदविह्वलः॥अश्नंत्यांक्वचिदश्नातिजक्षत्यांसहजक्षिति॥५७॥क्वचिद्गायतिगायंत्यांरुदंत्यांरु
दतिक्वचित्॥क्वचिद्धसंत्यांहसतिजल्पंत्यामनुजल्पति॥५८॥क्वचिद्धावतिधावंत्यांतिष्ठंत्यामनुति
ष्ठति॥अनुशेतेशयानायामन्वास्तेक्वचिदासतीं॥५९॥क्वचिच्छृणोतिशृण्वंत्यांपश्यंत्यामनुपश्य
ति॥क्वचिज्जिघ्रतिजिघ्रंत्यांस्पृशंत्यांस्पृशतिक्वचित्॥५९॥क्वचिच्चशोचतींजायामनुशोचतिदीनवत्
अनुहृष्यतिहृष्यंत्यांमुदितामनुमोदते॥६०॥

यंगतःविषूचीनंसर्वतोमुखंमनःमोहप्रसादहर्षास्तमःसत्वरजःकार्याणिजायाबुद्धिःआत्मजाइंद्रिय
परिणामास्तदुद्भवं॥५५॥इहतईहेतअन्ववर्ततअनुचकार॥५६॥नदेवाहंक्वचिदिति॥जक्षत्यांभक्षयंत्यां॥५७
आसतींआसीनाम्॥५८॥५९॥६०॥६१॥

भा॰ च॰ ८१

सर्वांश्च संगत्वादिलक्षणा प्रकृतिः स्वभावो वंचितो यस्य सर्वया प्रकृत्यावंचित इति वा ॥ नेच्छन् लौक्यात् पार
वर्णनात् ॥६४॥ इ॰ चतुर्थे पंचविंशः ॥२५॥ षड्विंशे मृगयाव्याजात्स्वप्नजागरणोक्तितः ॥ सङ्क्षिप्ता गयोगा
भ्यां संसृतिः सा प्रपंच्यते ॥१॥ नदेव मात्मनिऽव्यापि कृतो स्व प्रभावस्या जाग्रदवस्था वाक्या ॥ इदानीं स्वप्नावस्था
माह ॥ स एकदेति दशभिः ॥ महानिः श्वासो यन्तुं कर्तव्यभोत्तृत्वादिभिनिवेशो यस्य स रथमाह यत्पंच प्रस्थ
वनमगादिति द्वितीयेनान्वयः ॥ रथं तदानीमेव विसृष्टं तस्य मदेहं जाग्रदेहस्य स्यात तस्य वत्सराणघभोग्य प्रस्ते नो

विमलव्योमहृष्यैवं सर्वप्रकृतिवंचितः ॥ नेच्छन्नतुकरोत्सनं लौक्यात्कीडन्मृगोपथा ॥६५॥ इति श्री
भागवते चतुर्थे पुरंजनोपाख्याने पंचविंशः ॥२५॥ नारद उवाच ॥ स एकदा महेष्वासो रथं पंचाश्वमा
शुगं द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पंचबन्धुरं ॥१॥ एकरश्म्येकदमनमेकनीडं द्विकूवरं ॥ पंचप्रहरणं
सप्तवरूथं पंचविक्रमं ॥२॥

लक्षणात् ॥ पंच तस्या इन्द्रियाणि एवाश्वा यस्य ॥ आशुगं शीघ्रगतिं द्वे अहंताममते ईषे दंडिके यस्मिन् पुण्यपापे चक्रं यस्य ए स्या
कं प्रधानं अक्षो यस्य ॥ त्रयो गुणा वेणवो ध्वजा यस्य ॥ पंच प्राणा बंधुराणि बंधुनानि यस्य ॥ एकं मनो रश्मिः
प्रग्रहो यस्य ॥ एका बुद्धिर्दमनः सूतो यस्य तं च तं च ॥ एकं हृदयं नीडं रथिन उपवेशस्थानं यस्मिन् ॥ द्वौ शोकमो
हौ कूबरौ युगबंधनस्थानं यस्य पंच शब्दादयो विषया प्रह्रियंते प्रक्षिप्यंते यस्मिन् ॥ अस्य आख्याने भविष्यति
पंचेन्द्रियार्थ प्रक्षेप इति ॥ सप्त धातवो वरूथरक्षार्थं चर्मा द्यावरणानि यस्मिन् ॥ पंच कर्मेन्द्रियाणि विक्रमा

८१

हैमोपस्करः हैमो वर्णाभरणानि स्वर्णवर्मा स्वर्णमयं वर्म कवचं यस्य॥ रजोगुणावृतः अक्षयेषुधिः इषुधिर्निषंगः॥
अनंतवासनाहंकारोपाधिः॥ एकादशो मनोरूपश्चमूनाथः सेनापतिर्यस्य वा मनो नाम यस्य मनसः अथ द्वात्वे
कल्पविकल्पात्मकस्य द्वंद्वलनेन वलमाणस्य चमूनाथत्वमिति विभागः॥ पंच शब्दादयो विषयाः प्रस्था
मानेवा यस्मिन्॥ तद्वने भजनीयदेशमगात॥२॥ आत्ता गृहीता इषवो रागद्वेषादिरूपाः कार्मुकं च भोगाय अभि
निवेशरूपं येन॥ जायां विवेकवतीं बुद्धिं विहाय॥ अतदर्हां त्यागानर्हां त्यागे हेतुः॥ मृग्यंत इति मृगा विषयास्ते
ष्वसने भोगासक्तिः तेन लालसा स्पृहा यस्य॥४॥ बाणै रागादिभिः वनेषु भजनीयदेशेषु वनचरान् भजनीय

हैमोपस्करमारुह्यस्वर्णवर्माक्षयेषुधि॥ एकादशचमूनाथः पंचप्रस्थमगाद्वनं॥३॥ चचारमृ
गयां तत्र दृप्त आत्तेषुकार्मुकः॥ विहाय जायामतदर्हां मृगव्यसनलालसः॥४॥ आसुरीं वृत्तिमा
श्रित्य घोरात्मा निरनुग्रहः॥ न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान्॥५॥ तीर्थेषु प्रतिदृष्टेषु राजा
मेध्यान्पशून्वने॥ यावदर्थमलं लुब्धो हन्यादिति नियम्यते॥६॥

विषयान्यहनत आत्मसात्कृतवान्॥ कथ्यापदेशस्पष्टमेव॥५॥ ननु आसुरीं वृत्तिमाश्रित्येति किमिति निंद्यते मृ
गया॥ कथापदेशेषु तावच्छास्त्रे विहितैव सा॥ अत आत्मपदेशेऽपि जीवस्य विषयभोगो विहित एवेत्याशंक्याह ती
र्थेष्विति त्रिभिः॥ अयं भावः नहि मृगया विधीयते रागप्राप्तत्वात्॥ किंतु नियम्यते प्रवृत्तिः संकोच्यते॥ नियममेव
दर्शयति॥ यावदर्थमलं लुब्धो हन्यान्॥ नहि तीर्थेषु श्राद्धादिष्वेव तत्रापि प्रतिदृष्टेषु शास्त्र्या तेष्वेव
नियम्य श्राद्धादिषु तत्रापि यज्ञेषु मेध्यानेव न वनपशून्॥ यावदुपयोगमेवेति॥ एवं जीवस्य विषयसेवा यावदुपयो

भा० व०
९८

श्रेतो नावश्यतमित्याह ॥ यद्यति ॥ एवं नियतं कर्म विद्वान् ॥ तेनैव फलत्यागेन तेनाख्येनवा कर्मणो वमनुष्ठितेन त्वा
नं भवति ॥ तेन ज्ञानेन देहेन नासौ नुष्ठानेन लिप्यते ॥ ७ ॥ अन्यथा नियमालंघनेन श्रेतः करणशुद्ध्यभावात्कर
ताभिमानमारूढः कर्मभिरनुबध्यते ततश्च गुणप्रवाहे पतितो योनिं व्रजति ॥ ८ ॥ मासं संसारिकं परिसमाप्य पुनरपि
गयाममेवानुवर्तयन्ति ॥ तत्रेति ॥ चित्रा वाजा पत्रा येषां तैः विप्लवो नाशः करुणात्मनां हृत्पालूनां दुःसहः

एवं कर्म नियतं विद्वान्कुर्वीत मानवः ॥ कर्मणा तेन राजेन्द्र ज्ञानेन न स लिप्यते ॥ ७ ॥ अन्यथा कर्म कु
र्वाणो मानारूढो निबध्यते ॥ गुणप्रवाहपतितो नष्टप्रज्ञो व्रजत्यधः ॥ ८ ॥ तत्र निर्भिन्नगात्राणां चित्र
वाजैः शिलीमुखैः ॥ विप्लवो भूद्दुःखितानां दुःसहः करुणात्मनां ॥ ९ ॥ शशान्वराहान्महिषान्गव
यान्रुरुशल्यकान् ॥ मेध्यानन्यांश्च विविधान्विनिघ्नन् श्रममध्यगात् ॥ १० ॥ ततः क्षुत्तृट्परिश्रान्तो
निवृत्तो गृहमेयिवान् ॥ कृतस्नानोचिताहारः संविवेश गतक्लमः ॥ ११ ॥ आत्मानमर्हयांचक्रे धूपालेप
स्रगादिभिः ॥ साध्वलंकृतसर्वांगो महिष्यामादधे मनः ॥ १२ ॥ तृप्तो हृष्टः सुदृप्तश्च कंदर्पाकृष्टमानसः
न व्यचष्ट वरारोहां गृहिणीं गृहमेधिनीम् ॥ १३ ॥

९ ॥ १४ ॥ तदेवं स्वभावस्यादर्शिता इदानीं पुनरपि विवेकवत्या बुद्ध्या रममाणस्य पुराद्दिस्तत्तिष्यंचपि
थन् ॥ कथामोदयायतस्याः प्रणयकुपिताया अनुनयं प्रस्तावसहितमाह ॥ तत्र स्नाता स्यपावद्धाय
समाभि ॥ आर्द्रे इयिवानागतः कृतस्नानमुचिताहारस्थ्येन संविवेश शयामाश्रितः ॥ ११ ॥ १२ ॥ गृ
हमेधिनी सा किं कर्तृ हितराजस्यो द्व्यावर्तमानोना पश्यन् ॥ १३ ॥॥ ९८

वेदिषत्॥ द्विप्राचीनवर्हिः॥ अंतःपुरस्त्रियः॥ तत्सावीसेश्वरीणां ग्रामिनीसहितानां॥ यथाङ्गराजस्याद्विश्यमा
कं॥१४॥ यंगेचक्रादिरहिते॥१५॥ निरवस्तारेऽथ्रास्तरणारहिते॥१६॥ अथधुतांप्यकदेहादरा॥ तत्संगेनो न्मथि

अंतःपुरस्त्रियोऽप्पृच्छद्विमनाइववेदिषत्॥ अपिवःकुशलंरामाः सेश्वरीणांयथापुरा॥ नतथैतर्हिरो
चतेगृहेषुगृहमेधिनः॥१७॥ यदिनस्यान्नहेमानातापत्नीवापतिदेवता॥ यथैरथइवभ्रांतःकोनामीत
हीनवत्॥१८॥ कवर्ततेसाललनामज्ञेतेयसनाणांवै॥ यामामनुहरतेप्राप्तादीपयतीपदेपदे॥१९॥ रा
माऽऽऽऽतुः॥ नरनाथनजानीमः त्वंयियाथद्यवस्यति॥ भूतलेनिरवस्तारेशयानांपश्यपशाञ्चुहन्॥२०
पुरंजनःस्वमहिषीनिरीक्ष्यावधुतांभुवि॥ तत्संगोन्मथितज्ञानोवैक्लव्यंपरमंययौ॥२१॥ सांत्वयन्
श्लक्ष्णयावाचाहृदयेनविदूयता॥ प्रेयस्याः प्रेमसंरंभलिंगमात्मनिनाभ्यगात्॥२२॥ अनुनिन्येथ
शनकैर्वीरोऽनुनयकोविदः॥ पस्पर्शपादयुगलमाहचोत्संगलालितां॥२३॥ नूनंत्वकृतपुण्यास्ते
भृत्यायेष्वीश्वराः शुभे॥ कृतागस्स्वात्मसात्कृत्वाशिक्षादंडंनयुञ्जते॥२४॥

तेव्याकुलंस्त्वानंयस्य॥२५॥ प्रेमसंरंभःप्राणवकोयत्तस्यलिंगंकुटिलंदृष्ट्वादिस्मितंत्वत्यवान्॥२६॥ उत्संगमा
रोप्यलालितां॥२७॥ कृतमागःअपराधोयैः॥ तेषात्मसात्कृत्वाअस्मदधीनोयमितिमत्वाशिक्षार्थंदंडंनकुर्वंति

भा॰च॰
८८

यतः परमोनुग्रहो दृष्टोयत्त्वं दृष्टो विषीदति मोहः स्यादिह बाल इति ॥ वंधुकत्वं शितांशुकराणां अमर्षणः कोपी ॥२४॥
हे मंदरिहे स्वभ्रु हे मनस्विनी त्वमस्माकं स्वामिनी अतः स्वात्मा मुखं प्रदर्शय ॥ कीदृशं अनुरागभारेण क्रीडया व
योविलंब ॥ मंथरतातेन विलंबेन महितावलोकायस्मिन् ॥ नीलाम्रलकाः एव बालयः ॥ तेरुपस्कृतं भूषितं उ
त्तमनासिकं वल्गुवाकं पसिंस्त्वं ॥२३॥ हे वीरपत्नि वीरस्य मम भार्ये ॥ यत्त्वेकृतापराधः तस्मिन्नहं बालगुणा
लाद्यस्त्व ॥ अस्मिन्नरिपो दासारितरत्र दमदयेदं उकरोमि किं त्वं तं विगतभयमनस्त्वं मे देहि त्रिलोकाममध्ये ।

परमोनुग्रहो दृष्टो भयेषु प्रभुणार्पितः ॥ बालो न वेद न तन्निर्वंधुकृत्यममर्षणाः ॥२४॥ मा त्वं मनस्विनि दृति
स्वभ्रु नरागभारक्रीडाविलंबविलसद्धसितावलोक ॥ नीलालकालिभिरुपस्कृतमुन्नसं स्वानास्य
दर्शय मनस्विनि निवल्गुवाकं ॥२३॥ तस्मिन्नदये दममहं तव वीरपत्नि योन्यत्र भूषणरजालाकृतकि
ल्बिषस्ते ॥ पश्येन वीतभयमन्नमुदितं त्रिलोका ममत्रवेमुररिपोरितरत्रदासात ॥२४॥ वक्त्रं न ते
वितिलकं मलिनं विहर्षं संरंभभीममविसृष्टमपेतरागं ॥ पश्येस्तनावपि शुचोपहतौ सुजातौ वि
बाधरं विगतकुंकुमपंकरागम ॥२५॥

लोकत्रयाद्दृहि रणिन पश्यामि मद्भया देवाः सौ मरिष्यतीत्स
र्थः ॥२६॥ ते वक्त्रमितः एवं कदाचिदपि वितिलकं न पश्यामि ॥ संरंभेण कोपावेशेन भीमं भयंकरमविसृष्ट
मनुज्वलं अपरागं स्नेहशून्यं तथा ते सुजातौ शोभनौ स्तनावपि शोकाश्रुभिरुपहतौ न पश्यामि तथा विंबा
फलाकारमधरं विगतं कुंकुमपंकत्वस्य तांबूलरागोयस्मात्ता दृशं न पश्यामीदानीं कृतमेवं जानीति शे
षः ॥ पाठांतरे एवं भूतं मन्नवं स्तनौ च पश्यन्न शोन विरामी समनयः ॥ विगतः कुंकुमपंकरागो याभ्यामिति स्त

नर्मविलासम ॥२५॥
८८

तत्तस्मात्कृतं किल्बिषमपराधो येन तस्य किल्बिषमेवाह ॥ स्वैरं स्नातं प्रेम्णा तामप्यदृष्ट्वा मृगयां गतस्य देवो देव
नं क्रीडा रतिं ददातीति देवरः कान्तः तं कामवेगेन विस्रस्तं गतं धैर्यं यस्य तं ॥ उशती कामयमाना कृ
पया कं तं योगे अर्थे का भजेत ॥ २८ ॥ इति चतुर्थे षड्विंशः ॥ २६ ॥ सप्तविंशे प्रियापुत्र्यामत्त्या विसृष्टनात्मनः ॥
कालकन्याप्युपाख्यानेनेवरोगायुदीर्यते ॥ तदेवं जीवस्यानुनयादिकथा सौदर्यं प्रेम्णा ॥ अथ तं उपाधिवश्यपा
तमुत्क्रान्तन्निमित्तं संसारपरं पर्यायेनिरूपयितुमाह ॥ इत्यमिति ॥ अत्र च प्रतिपदं कथंचिदध्यात्मपदे विद्योज

तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरं गतस्य मृगयां व्यसनातुरस्य ॥ का देवरं वशगतं कुसुमास्त्र
वेगविस्रस्तपौंस्यमुशती न भजेत कृत्ये ॥ २८ ॥ इति श्रीभागवते चतुर्थे षड्विंशः ॥ २६ ॥ नारद उवा
च ॥ इत्थं पुरंजनं सध्र्यग्वशमानीय विभ्रमैः ॥ पुरंजनी महाराज रेमे रमयती पतिं ॥ १ ॥ स राजा महि
षीं राजन्सुस्नातां रुचिराननां ॥ कृतस्वस्त्ययनां तृप्तामभ्यनंददुपागतां ॥ २ ॥

चितं मशक्यमेव श्रोतारं देन तज्जीवस्य स्त्रीपुरुषवासनादार्ढ्यं विचित्रा संसृतिर्भवतीत्येतावदेव कथातात्पर्यं
निदर्शितं ॥ कश्चित्पुमान्कश्चिदास्त्रीत्वं विप्रो भयमन्दधीः ॥ देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः इति वदता
तत्रादौ पुंस्त्वेन संसृतिरध्यायत्रयेणोक्ता ॥ ततश्चैकेनाध्यायेन स्त्रीत्वेन संसृतिं प्रदर्श्य गुरुप्रसादलब्धज्ञानेन
मोक्षमुक्तं ॥ ततस्तद्देवयथोपयोगं आख्यातमिति पंचाध्यायारंभः प्रतीयते ॥ प्रतिपदंत्वध्यात्मयोजनं नातिउ
पयोगी निःप्रयोजना चेति स्पष्टार्थं प्रत्याख्यानमनादृत्य यथोपयोगमेव व्याख्यास्यामः ॥ सध्र्यक् सम्यक् ॥ विभ्रमैः वि

तोषैः ॥ २ ॥ कृतं तत्स्मरणं तं भगवल्लोकज्ञानसिद्धिहेतुभिः वर्णिताश्रम ॥ २ ॥

भा॰च॰
१॰

उपगूढः परिरब्धः परिरब्धा कंधरा तस्या येन रहस्य एकांते ॥ अनुमंत्रैः अनुकूलगुह्यभाषणैः ॥ अपकृष्टा चेतना
विवेको यस्य ॥ कालरंहः ॥ आयुर्व्ययं प्रमदैव परिज्ञानसाधनं यस्य ॥ ५५ ॥ महार्हे तल्पे उत्कृष्टशय्यायां शयानः
महिष्या भुजउपधिः उपधानं तच्छीर्षकं यस्य ॥ अविसर्गोपादेशयनक्रियाविशेषणं तां महिषीमेव परं पुरुषा

तयोपगूढः परिरब्धकंधरो रहोनुमंत्रैरपकृष्टचेतनः ॥ न कालरंहो बुबुधे दुरत्ययं दिवानिशेति प्रम
दापरिग्रहः ॥ ५५ ॥ शयान उन्नद्धमदो महामना महार्हतल्पे महिषीभुजोपधिः ॥ तामेव वीरो मनुते परं
यः तमोभिभूतो न निजं परं च यत् ॥ ५६ ॥ तयैवं रममाणस्य कामकश्मलचेतसः ॥ क्षणार्द्धमिव रा
जेंद्र व्यतिक्रांतं नवं वयः ॥ ५७ ॥ तस्यामजनयत्पुत्रान्पुरंजन्यां पुरंजनः ॥ शतान्येकादश विराडायु
षोर्द्धमथात्यगात् ॥ ५८ ॥ दुहितृर्दशोत्तरशतं पितृमातृयशस्करीः ॥ शीलौदार्यगुणोपेताः पौरं
जन्यः प्रजापते ॥ ५९ ॥ स पंचालपतिः पुत्रान्पितृवंशविवर्द्धनान् ॥ दारैः संयोजयामास दुहितृः सदृ

यं मन्यत ॥ न तु यन्निजं रूपं ब्रह्म तत् ततः ॥ तमसा अज्ञानेनाभिभूतो यतः ॥ ५६ ॥ ५७ ॥ पुत्रानिंद्रियपरिणामान् दु
हितृः तदनंतरं बुद्धिवृत्तीः पुत्रसंख्या च वाङ्मात्रविवक्षया ॥ दुहितृसंख्या तु पुत्रेभ्यो न्यूनत्वेन गम्या
दृष्यसौ दृष्ट्यार्थे विराड् सम्राट् ॥ आयुषोर्द्धमित्सायपि कथा सौदर्यार्थमेव ॥ ५८ ॥ पुरंजनकन्या तात
पौरंजन्यः ॥ हे प्रजापते ॥ ५९ ॥ दारैः परिणाममानैर्नरहिताहितचिंताभिः ॥ वरैः रूपचितविषयभोगैः ॥ ६०

पुत्राणां पुत्रः कर्माणि पांचालेषु शब्दादिविषयेषु ॥८॥ तेषु पुत्रादिषु तेषामपि ये रिक्थहराः पुत्रास्तेषु च॥ ॥१०॥
युक्तेषु आत्महितेषु कर्मसु अनवहितस्य स वै कालः जरामयः ॥११॥ चंडवेगः संवत्सरः एव तं नामानेनोपलक्षित

पुत्राणां चाभवन्पुत्रा एकैकस्य शतं शतं ॥ यैर्वै पौरंजनो वंशः पांचालेषु समेधितः ॥८॥ तेषु तद्रिक्थ
हारेषु गृहकोशानुजीविषु ॥ निरूढेन ममत्वेन विषयेष्वन्वषज्जत ॥९॥ ईजे च क्रतुभिर्घोरैर्दीक्षितः प
शुमारकैः ॥ देवान्पितॄन्भूतपतीन्नानाकामो यथा भवान् ॥१०॥ युक्तेष्वेवं प्रमत्तस्य कुटुंबासक्तचेतसः
आससाद स वै कालो योऽप्रियः प्रिययोषितां ॥११॥ चंडवेग इति ख्यातो गंधर्वाधिपतिर्नृप ॥ गंधर्वास्त
स्य बलिनः षष्ट्युत्तरशतत्रयं ॥१३॥ गंधर्व्यस्तादृशीरस्य मैथुन्यश्च सितासिताः ॥ परिवृत्त्या विलुंपंति स
वै र्वकामविनिर्मितां ॥१४॥ ते चंडवेगानुचराः पुरंजनपुरीं यदा ॥ हर्तुमारेभिरे तत्र प्रत्यषेधत्प्रजागरः ॥
१५॥ स सप्तभिः शतैरेको विंशत्या च शतं समाः ॥ पुरंजनपुराध्यक्षो गंधर्वैर्युयुधे बली ॥१६॥ क्षीयमाणे
स्वसंबंधे एकस्मिन्बहुभिर्युधि ॥ चिंतां परां जगामार्तः सराष्ट्रपुरबांधवः ॥१७॥

गंधर्वा दिवसाः ॥१३॥ गंधर्व्यो रा
त्रयः तादृशीः तावत्यः मैथुन्यः अहोरात्रिवत् मिथुनीभूय स्थिताः सिताश्चासिताश्च शुक्लकृष्णपक्षीयाः परिभ्रमेण
सर्वैः कामैः सह विनिर्मितां पुरीं अपहरंति ॥१४॥ प्रजागरः प्राणः ॥१५॥ सप्तभिः शतैः विंशत्या च सह ॥१६॥ स्वसंबं

पुरंजनोपाख्याने ॥२८॥

भा॰ च॰
१९

सधवमपुभक्त्वलट्स्वरुवभोक्तासपार्थदेशीतिचेनौविरतनालोचितवान ॥१९॥ कालमद्भुदिताजराभिथा ॥
नपुरुमनेदत्तनेच्छत ॥ वर्हिष्मनेदेशाचीनवर्हिः ॥१९॥ एवमेवययातिपुत्राययतेनहृतामतीवुरुमहातययातिःशुक्र
शपाज्जराप्राप्यपुत्रानुवाच ॥ इमांमद्दीतेतितांज्येष्ठाःचत्वारोनजगृहुः पुरुस्तुजगृहे ॥ ततोययातिस्तस्मै

सप्तवपुरूपांमपुभक्तपंचालेषुसपार्थदेः ॥ उपनीतंवलिंगृह्णन्स्त्रीजितोनाविदद्भयं ॥१५॥ कालमद्भु
ता हिंकाचित्त्रिलोकांवरमिच्छती ॥ पर्यटंतीनवर्हिष्मत्यसनेदत्तकश्चन ॥१९॥ दौर्भगेनात्मनोलोके
विख्यातादुर्भगेतिसा ॥ यातस्याराजमषयेहृतादास्यवेवरं ॥२०॥ कदाचिद्दृष्टमानासाब्रह्मलोका
महींगतं ॥ ववेबृहद्व्रतेंमोतजानंतीकाममोहिता ॥२१॥ मयिसंरंभविपुलमदाच्छापंसुदुःसहं ॥ स्था
तुमर्हसिनैकत्रमयाचाविमृतोकने ॥२२॥ ततोविहितसंकल्पाकन्यकायवनेश्वरं ॥ मयोपदिष्टमा
साद्यवव्रेनाम्नाभयंपतिं ॥२३॥ ऋषभंयवनानांत्वांवृणोमीरेप्सितंपतिं ॥ संकल्पस्त्वयिभूतानांकृ
तःकिलनरिष्यति ॥२४॥ द्वाविमावनुशोचंतिवालावसदवग्रहौ ॥ यल्लोकशास्त्रोपनतंनराति

राज्यंददाविति जराचादादिसत्तं ॥२०॥२१॥ अथाभ्यागत्तवतिमयिसंरंभंक्रोधंकृतानैकत्रस्थातुमर्हतीति
शापमदात ॥२२॥ भयपोभापयश्चयवनाः तेषामीश्वरंभयनामानंववे ॥२३॥ हेवीरत्वामीप्सितंपतिंवृ १९
णोनरिष्यतिनिनश्यति ॥२४॥ लोकतोवेदतश्चयद्देयतेनग्राह्यतेनचउपनतंमांमत्ततयाचतेयोनददा
तियश्चदीयमानंनेच्छति इमौद्वौकर्मभ्रष्टौअनुशोचतिसंतः ॥२५॥

पुरुषेणाकर्तव्यो धर्मः पौरुषः ॥ २६ ॥ देवगुह्यं संहरणं तद्धि प्राणिनां वैराग्यायानुदयाय देवैर्गोप्यते ॥ २७ ॥ न भर्ता तव
समाधिना ज्ञानदृष्ट्या याच्यमानोऽपि लोकस्त्वां नैच्छति ॥ २८ ॥ अव्यक्तगतिः ॥ कुतः शापेन अलक्षितगतिः स
ती लोकमाक्रम्य भुंक्ष्व ॥ एवं सर्वोऽपि लोकस्त्वत्पतिः स्यादित्यर्थः ॥ न चैवं त्वया शंकनीयं मां प्रति कृतलोको
हनिष्यतीति यस्मात्त्वमेव प्रजानाशं करिष्यसीत्याह ॥ याहीति ॥ या मदीया यवनसेना तया युक्ता ॥ २९ ॥ किं

अथो भजस्व मां भद्र भजंतीं मे दयां कुरु ॥ एतावान्पौरुषो धर्मो यदार्ताननुकंपते ॥ २६ ॥ कालकन्यो
दितवचो निशम्य यवनेश्वरः ॥ चिकीर्षुर्देवगुह्यं स सस्मितं तामभाषत ॥ २७ ॥ मया निरूपितस्तुभ्यं प
तिरात्मसमाधिना ॥ नाभिनंदति लोकोऽयं त्वामभद्रामसंमतां ॥ २८ ॥ त्वमव्यक्तगतिर्भुंक्ष्व लोकं कर्मवि
निर्मितं ॥ या हि मे पृतनायुक्ता प्रजानाशं प्रणेष्यसि ॥ २९ ॥ प्रज्वारोऽयं मम भ्राता त्वं च मे भगिनी भव ॥
चराम्युभाभ्यां लोकेऽस्मिन्नव्यक्तो भीमसैनिकः ॥ ३० ॥ इति श्रीभागवते चतुर्थे पुरंजनोपाख्याने सप्तविं
शः ॥ २७ ॥ नारद उवाच ॥ सैनिका भयनाम्नो ये बर्हिष्मन्दिष्टकारिणः ॥ प्रज्वारकालकन्याभ्यां विचेरु

च प्रज्वार इति ॥ मारको वै स सर्वो ज्वरः प्रज्वरः माहेश्वरस्य व्याधेः तत्पातित्वात् ॥ भीमो घोरः ॥ सैनिका यस्य ॥ ३० ॥
इति चतुर्थे सप्तविंशः ॥ २७ ॥ अष्टाविंशे तु वैदर्भीभावेन स्त्रीविचिंतया ॥ स्त्रीत्वं प्राप्तस्य देवेन कदाचिन्मुक्ति
रुच्यते ॥ १ ॥ इदानीं पुरंजनस्य पुंदेहत्यागप्रकारपूर्वकस्त्रीत्वप्रकारमाह ॥ सैनिका इत्यादि राजसिंहवेश्मा
नीयंते तेन दिष्टं दैवं कुर्वंतीति तथा मृत्योरादेशकारिण इति वा ॥ १ ॥ ॥

जरत्पन्नगेन जीर्णप्राणेन पालितां ॥३॥४॥ द्वार्भिः चक्षुरादिभी रोगरूपेण प्रविश्य ॥५॥६॥ कन्यया जरयोपगू-
भा॰ च॰ ढः सन् तत्प्रतिक्रियां न लेभ इति तृतीयेनान्वयः ॥ हृतैश्वर्यउत्थानादिष्वसक्तः ॥७॥ प्रतिकूलानप्रेपितान्
१२ विषयप्रापणेन ॥ अनादृतान् आदरमकुर्वाणान् ॥ स्वाधीनत्वाभावात् ॥ अनुगा इंद्रियाणि अमात्या इंद्रियदे-

त एकदा तु तरसा पुरंजनपुरीं नृप ॥ रुरुधुर्भौमभोगाढ्यां जरत्पन्नगपालितां ॥३॥ कालकन्यापि बु-
भुजे पुरंजनपुरं बलात् ॥ ययाभिभूतः पुरुषः सद्यो निःसारतामियात् ॥४॥ तयोपभुज्यमानां वै यव-
नाः सर्वतोदिशं ॥ द्वार्भिः प्रविश्य सुभृशं प्रार्दयन्सकलां पुरीं ॥५॥ तस्यां प्रपीड्यमानायामभिमानी
पुरंजनः ॥ अवापोरुविधांस्तापान्कुटुंबी ममताकुलः ॥६॥ कन्योपगूढो नष्टश्रीः कृपणो विषया-
त्मकः ॥ नष्टप्रज्ञो हृतैश्वर्यो गंधर्वयवनैर्बलात् ॥७॥ विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान् ॥
पुत्रान्पौत्रानुगामात्याञ्जायां च गतसौहृदां ॥८॥ आत्मानं कन्यया ग्रस्तं पंचालानरिदूषितान् ॥
दुरंतचिंतामापन्नो न लेभे तत्प्रतिक्रियां ॥९॥ कामानभिलषन्दीनो यातयामांश्च कन्यया ॥ विग-
तात्मगतिस्नेहः पुत्रदारांश्च लालयन् ॥१०॥

वाः ॥ गतसौहृदां अध्यवसायाभावात् ॥८॥ अरिभिर्विघ्नादिभिर्दूषितान् ॥९॥ कालेन कन्यया हेतुभूत-
या ॥ यातयामान् निःसारानपि कामान् ॥ विगता आत्मनो गतिः ॥ पारलौकिकी ऐहिकाः पुत्रादिस्नेहो १२
यस्य स्नेहादिति वा पाठः ॥१०॥

राजा पुरंजनो हातुं प्रचक्रमे उपक्रांतवानिति ह्योरन्वयः ॥ अनिकामतः ॥ अनिच्छयापि ॥ १० ॥ सपरिच्छदः प्रसव
र्गसहितः कुटुंबेन दीप्यतीति कौटुंबिकः ॥ कुटुंबिन्या ॥ संधिर्नात्र विवक्षितः सान्वयः पुत्रादिसहितः ॥ १२ ॥ यव

गंधर्वैर्यवनाक्रांतां कालकन्योपमर्दितां ॥ हातुं प्रचक्रमे राजा तां पुरीमनिकामतः ॥ १० ॥ भयनाम्नोऽग्रजो
भ्राता प्रज्वरः प्रत्युपस्थितः ॥ ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया ॥ ११ ॥ तस्यां संदह्यमानायां स
पौरः सपरिच्छदः ॥ कौटुंबिकः कुटुंबिन्या उपातप्यत सान्वयः ॥ १२ ॥ यवनोपरुद्धायतनो ग्रस्तायां काल
कन्यया ॥ पुर्यां प्रज्वरसंसृष्टः पुरपालोऽन्वतप्यत ॥ १३ ॥ न शेके सोऽवितुं तत्र पुरुकृच्छ्रोरुवेपथुः ॥ गंतु
मैच्छत्ततो वृक्षकोटरादिव सानलात् ॥ १४ ॥ शिथिलावयवो यर्हि गंधर्वैर्हृतपौरुषः ॥ यवनैररिभी राज
न्नुपरुद्धो रुरोद ह ॥ १५ ॥ दुहितॄः पुत्रपौत्रांश्च जामिजामातृपार्षदान् ॥ स्वत्वावशिष्टं यत्किंचिद्गृहको
शपरिच्छदं ॥ १६ ॥ अहं ममेति स्वीकृत्य गृहेषु कुमतिर्गृही ॥ दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते ॥ १७ ॥
लोकांतरं गतवति मय्यनाथा कुटुंबिनी ॥ वर्तिष्यते कथं त्वेका बालकाननुशोचती ॥ १८ ॥

नैरुपरुद्धान्यायतनानि यस्य स पुरपालः प्राणः ॥ १३ ॥ पुरु बहु कृच्छ्रं यस्य तेन उरुर्वेपथुर्यस्य सानलात् वृक्षकोटरादि
व सर्पः ॥ १४ ॥ केनैरुपरुद्धः रुरोद चुक्रोश ध्वनिं चकार ॥ १५ ॥ दुहित्रादीन् दध्यौ विस्तरेणान्वयः ॥ जामयोऽत्र स्नुषाः सुता

[illegible]

ध्यानमेवाह॥ अनाशितेअशोजितेभर्त्सितेभर्त्सनेकृतेयतवाग्भवति॥१९॥अविवेकिनंअविज्ञंमांअपृथितेदे
शांतरगतेमरहमेधीयवत्सेमहयमेअपिकिंनेष्यति॥अनुवर्तेपिष्यति॥एतमेततयतोवीरमूः॥पुत्रवती
भा॰च॰ १३ किंवामहिरहमसहमानामामभिगमिष्यसेवेसर्थः॥२०॥नविद्यतेपरमयनमाश्रयोयेषांतेअपरायणाः

नमध्यनाशितेभंकेनास्नातेस्नातिममम॥मयिहृष्टेहृष्टेसंत्रस्ताभर्त्सितेपतवाम्भयात॥२१॥अवेक्षयय
तिमाविज्ञेमेपितेशोककर्षिता॥वर्तमेतद्गृहमेधीयवीरमूरपिनेष्यति॥२२॥कथंनुदारकादीनादा
रिकीवीपरायणाः वृत्तिष्यंतेमयिस्वर्गेभित्रनाववाद्वैदधौ॥२३॥एवंकृपणयावृष्ट्याशोचंतमतद्देहे
णं॥यद्दीनःकृतधीरेणाभयनामाभिपद्यत॥२४॥पश्चवयवनेरेवनीयमानःस्वकंतयं॥अनुद्रवन्नगु
पत्याःशोचंतोभृशमातुराः॥२५॥पूर्वीविहायोपगतउपरूढोभुजंगमः॥यदातमेवानुपुरीविशीर्णाप्र
कृतिंगता॥२६॥विक्रुष्यमाणाःप्रसभंयवनेनवलीयसा॥नाविंदंतमसाविष्टःसखायंसहृदंपुरः॥२७

पुत्राःकन्याश्च॥यद्दोपरश्रयाःकन्याःमित्राणौर्येषां॥२८॥अतद्देहेणंवल्लतमत्सस्वप्रलतावात॥२९॥एषयदात्वयेस्या
नेनीयमानः॥तदाअनुपत्याःप्राणाइंद्रियाणिच॥तयाचप्रकृतिः॥नमउक्रामंतेप्राणाःउक्रामति॥प्राणमनु॥ १३
क्रामंतेसर्वेप्राणाअनुक्रामति॥३०॥प्रकृतिमहाभूतात्मनो॥३१॥नाविंदन्नसस्मार॥पुरःएवंसखायंमंतमीश्वरं २५

अदयालुनाकाम्यकर्मसुयेसंज्ञप्ताः हताः॥अमीवंपापंक्रोधोवा॥२६॥शाश्वतीः समाबहून्संवत्सरानार्ति
मनुभूय॥२७॥अंतकालेतांभार्यामेवमनसागृह्णन्स्मरन्अनंतरं॥विदर्भस्यवेश्मनिप्रमदोत्तमाबभूव॥अतः
परस्मिन्प्रकरणेएतावदेवप्रकृतोपयोगिविवक्षितं॥स्त्रीध्यानेनस्त्रीत्वप्राप्तावपिपतिध्यानेनपूर्वार
ब्धेनचयासिंकाहिदर्भात्जन्माभूत्पार्सिकसंयोगेनविष्णुभक्तस्यभागवतेनमलयध्वजेनसंयोगोभूत्ततोविष्णु
भक्तिः॥ततोवैराग्यंततस्तमेवभर्तृरूपंगुरुंपातिव्रत्यधर्मेणभजतोभगवत्प्रसादलब्धज्ञानेनमोक्षइति

तंयज्ञपशवोनेनसंज्ञप्तायेदयालुना॥कुठारैश्चिच्छिदुः क्रुद्धाः स्मरंतोमीवमस्यतत्॥२६॥अ
नंतपारेतमसिमग्नोनष्टस्मृतिः समाः॥शाश्वतीरनुभूयार्तिंप्रमदासंगदूषितः॥२७॥ता
मेवमनसागृह्णन्बभूवप्रमदोत्तमा॥अनंतरंविदर्भस्यराजसिंहस्यवेश्मनि॥२८॥उपये
मेवीर्यपणांवैदर्भींमलयध्वजः॥युधिनिर्जित्यराजन्यान्पांड्यः परपुरंजयः॥२९॥

अस्यास्तुकथालंकारमात्रंनतथापिकिंचिद्व्युत्पत्तिमात्रमस्येहयोजयिष्यामः॥विदर्भस्यविशिष्टधर्मोपलक्षित
स्यकर्मठस्यराजसिंहस्यधर्मेणादिप्रजापालनेनयज्ञादिनाचदत्तविद्याराजेतेतेश्रेष्ठस्यवेश्मनि॥२८॥
मलयोपलक्षितेदक्षिणदेशेध्वजवद्दर्शनीयः॥सद्भिःश्रीविभक्तप्रधानोदेशस्तत्रप्रख्यः॥महाभागवत
इत्यर्थः॥पंडापंडाकान्तिनिश्चयबुद्धिःतामर्हतीतिपांड्यः॥सउपयेमेपुरंजनोभागवतसंगप्राप्तइत्यर्थः॥२९॥

भा॰च॰ १४ आत्मजो श्रीकृष्णसेवाकृचित्तसंगेन भगवद्धर्मेण विरभूदित्यर्थः॥ अर्पितस्य श्रीकृष्णे स्वेन तदर्पणं यथा तो॥ यवीय
सः समस्तान॥ श्रवणकीर्तनविस्मोः स्मरणपादसेवनं॥ अर्चनं वंदनं दास्यमिति भक्तिप्रकाराणां॥ सख्यात्मनि
वेदनयोः स्वपदार्थज्ञानेनांतरंकालत्वात्॥ तस्य च भगवते वोत्तरत्रोपदेक्ष्यमाणत्वादिदानीमनुक्तत्वेऽपि ते संभवंतीत्यर्थः॥ भ
गवद्धर्मकृच्छात श्रवणकीर्तनादिकं ज्ञानमित्यर्थः॥ ऋद्धिविद्भूमिपालकान्॥ ऋद्धिविद्भूमिर्हि श्रवणादिभक्तिभि
र्वश्यरवितास्तीति प्रसिद्ध॥ ११॥ अर्बुदमिति श्रवणादीनां प्रत्येकमनेकप्रकाराश्चभवन्नित्यर्थः॥ तदुक्तं॥ भक्ति
योगो बहुविधो मार्गैर्भामिनि भाव्यत इति॥ येषां वंशधरैः यतः प्रवृत्तैः संप्रदायभेदैः कृत्स्ना मही मन्वंतरे तावत्प

तस्यां स जनयांचक्रे आत्मजानमितेक्षणा॥ यवीयसः समस्तानसमद्धिविद्भूभृतः॥१०॥
एकैकस्याभवत्तेषां राजन्नर्बुदमर्बुदं॥ भोक्ष्यते यद्वंशधरैर्मही मन्वंतरं परम्॥ ११॥ आग
स्त्यः प्राग्दुहितरमुपयेमे धृतव्रताम्॥ यस्यामिद्धस्सुतो जातः ध्मवाहात्मजो मतिः॥१२

रेव भोक्ष्यते॥ अविद्याकामकर्मभ्योऽपि रक्षिष्यते॥११॥ आगस्त्यः अगानि निष्क्रियाणि गच्छति स्तोयति संवा
तयतीत्यगस्त्यो मनः प्राक् प्रथमजातां दुहितरं कृष्णसेवाकृच्चिमुपयेमे॥ तस्य मनः कृष्णे दृढां रतिं ववंधेत्यथ
इत्यर्थः॥ धृतानि शमदमादीनि व्रतानि यया तां रतिं दृढेभ्यः सत्यलोकादिभोगेभ्योऽपि च्युतत्वादिद्धितादि॥ कृष्ण
रता विहाय स्वफलभोगविरागो जात इत्यर्थः॥ सर्वोपशमात्मको मुनिः॥ कथंभूतः इध्मवाहः आत्मजो य
स्य सः॥ तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः॥ श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतिप्रसिद्धा समिद्वहनोप
लक्षितागुरूपसत्तिर्विरागादभूदित्यर्थः॥ न हि विरक्तस्य गुरूपसत्तिः संभवति॥ कथापदेषु यथाश्रुतमेव॥ १२ १४

क्ष्मां विभज्य तत्र श्रवणादिभक्तिभेदं प्रवर्त्याप्य ॥३३॥ इदानीं पुरंजनस्य स्त्रीभावं प्राप्तस्य सर्वतो विरक्तस्य गतिरेव गुरुस्त्रीणामिति वचनात्पतिसेवाशुश्रूषाप्रकारं दर्शयितुमाह ॥ हित्वेत्यादिना मनोदधे इत्यंतेन ग्रंथेन मदयतीति मदिरे ईक्षणे यस्याः ॥३४॥ तत्र चंद्रवसाद्या नद्यः तासां पुण्यैः सलिलैरुभयत्रांतर्बहिश्चात्मनो

विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः ॥ आरिराधयिषुः कृष्णं स जगाम कुलाचलं ॥३३॥
हित्वा गृहान्सुतान्भोगान्वैदर्भी मदिरेक्षणा ॥ अन्वधावत पांड्येशं ज्योत्स्नेव रजनीकरं ॥३४॥
तत्र चंद्रवसा नाम ताम्रपर्णी वटोदका ॥ तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन् ॥३५॥
कंदाष्टिभिर्मूलफलैः पुष्पपर्णैस्तृणोदकैः ॥ वर्तमानः शनैर्गात्रकर्षणं तप आस्थितः ॥३६॥
शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये ॥ सुखदुःखे इति द्वंद्वान्यजयत्समदर्शनः ॥३७॥
तपसा विद्यया पक्वकषायो नियमैर्यमैः ॥ युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः ॥३८॥
आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः ॥ वासुदेवे भगवति नान्यद्वेदोद्वहन्रतिं ॥३९॥

मलं क्षालयन् तप आस्थितः इत्युत्तरेणान्वयः ॥३५॥ अस्यते भक्ष्यते इत्यष्टिर्बीजं ॥३६॥ विद्ययोपासनया पक्वकषायः दग्धकामादिवासनः ॥ युयुजे आत्मनो ब्रह्मतां भावयामास ॥ अक्षाणींद्रियाणि ॥ अनिलः प्राणः आशयः चित्तं विजिता अक्षादयो येन ॥३८॥ आस्ते स्म वर्षशतमिति ज्ञानस्य दृढसाधनतां दर्शयति ॥ अत एव भक्तिं कृतवानित्याह ॥ वासुदेवे रतिमुद्वहन् ॥ अन्यत् देहादिकं न वेद ॥३९॥

भा॰च॰ सएवंवर्त्तमानः आत्मन्यात्मानंविद्वानस्मस्मात्उपरराम॥ कथंविद्वानव्यतिरिक्ततया॥ देहादिव्यतिरिक्तत्वेन
ऊतःव्यापकतयादेहादिप्रकाशकत्वेन॥ ननुदेहाद्याकारोपेतत्प्रकाशयतिनतुनिराकारआत्मातत्राह॥ अम
१५ र्षस्यापिसाक्षिणं॥ अयंभावः॥ अमर्षोनामांतःकरणवृत्तिः साचजडत्वात्आत्मप्रकाश्यैवेति॥ यथासुमेरुशिरं
छिन्नरसप्रादिप्रतीतौतद्व्यतिरिक्तमात्मानंवेत्तितद्वत्॥ ३८॥ केनविद्वानतत्राह॥ साक्षाद्धरिरेवयोगुरुः तेनोक्तेन
सर्वतोमुखंयथातथास्फुरताअनवच्छिन्नेनज्ञानेन॥ ३९॥ तदेवाहपरइति॥ ब्रह्मैवाहंनसंसारीतिब्रह्मण्यात्मा

सव्यापकतयात्मानंव्यतिरिक्ततयात्मनि॥ विद्वान्स्वमर्षामर्षसाक्षिणंविरराममह॥ ३८॥ साक्षाद्भगव
तोक्तेनगुरुणाहरिणानृप॥ विशुद्धज्ञानदीपेनस्फुरताविश्वतोमुखं॥ ३९॥ परेब्रह्मणिचात्मानंपरंब्र
ह्मतथात्मनि॥ ईक्षमाणोविहायेत्थमस्माद्उपरराममह॥ ४०॥ पतिंपरमधर्मज्ञंवैदर्भीमलयध्वजं॥ प्रेम्णा
पर्यचरद्धित्वाभोगान्सापतिदेवता॥ ४१॥ चीरवासाव्रतक्षामावेणीभूतशिरोरुहा॥ बभावुपपतिंशां
ताशिखाशांतमिवानलं॥ ४२॥

नष्टत्वाणोशोकादिनिवृत्तिः॥ अहमेवब्रह्मेत्यात्मनब्रह्मपारोपनिवृत्तिः॥ अतोव्यतिहारेण अस्मात्संसाराद्उप
रराम॥ ननुएवमपिजीवस्यजडत्वोब्रह्मत्वानुपपत्तिः॥ ईक्षमाणस्येवव्यवधायकत्वादित्याशंक्याह॥ ईक्षांविहायदग्धेंध
नानलवत्स्वयः स्वयमेवोपशांतेतिभावः॥ ४१। ४२॥ उपपतिंपत्युः समीपे॥ यद्वापत्युः किंचिन्मात्रंन्यूनात्समा
नासत्तीवभाविनमर्थः॥ उपोधिकेचेतिकर्मप्रवचनीयः॥ तयोर्योगेवद्वितीयाशांतमंगारावस्थमनलमुपशांतासु

॥ ११ ॥
१५

तदानीमपि सखि स्थिरमाश्रमं नेयसा ॥ अत एवाजानती गृहात् तदा यथापूर्वं समसेवत ॥ ४५ ॥ यस्मिंश्चिन्मर्चयन्ती यया
तस्मिंस्त्रेत्रा वृक्षाणां नापश्यत ॥ सं विग्रहदयाभयचकिता ॥ ४६ ॥ अवंधुपतिरहितमत्तभिरासिच्य ॥ ४७ ॥ व

अजानती प्रियतमं तदोपरतमंगना ॥ स्थिरामनमभ्साद्य यथा एवं समुपाचरत ॥ ४५ ॥ यथा नोपलभे
तेत्रा वृक्षाणां पसर चेती ॥ आसीत्तं विग्रहदया पृथग्भ्रष्टा मृगी यथा ॥ ४६ ॥ आत्मानं शोचती दीनम
बंधुविलवास्कभिः ॥ तनावासि च विपिने सुखं पुरुवो दृशा ॥ ४७ ॥ उत्तिष्ठोत्तिष्ठ राजेंद्र मामद्य विमे
स्तलो ॥ दस्युभ्यः त्वयवंधुभ्यो बिभ्यंती पातुमर्हसि ॥ ४८ ॥ एवं विलपती बाला विपिने ऽनुगता पति ॥ पति
नापश्यो भर्तुः रुदं न सम्यगेव वर्जयत ॥ ४९ ॥ चित्तादाहमयी चितां तस्योपसं कलेवरं ॥ आदीप्य चानुम
रणं विलपती मनो दधे ॥ ५० ॥ तत्र एवं तरं कश्चित् सत्वात्मा लक्षणज्ञानवान् ॥ सोऽतपन वल्गुना साम्ना ता
मा हरुदंती प्रभो ॥ ५१ ॥ कांतं कस्यासि को वा यं शयानो यस्य शोचसि ॥ जानासि किं सखायं यं सा येना ग्रे वि

अवंधुभ्यः अधार्मिकत्वत्रियेभ्योपि ॥ ४८ ॥ अवर्तयत प्रवर्तयामास ॥ ४९ ॥ तस्यां निधाय अग्निदानेनादीप्य च
५० ॥ पूर्वं तरं अनादिरीश्वरः सखा ॥ द्वासुपर्णाविति श्रुतेः ॥ तान्त्वा प्रियवाक्येन संबोधयन् ५१ यस्त्वं चा।
सि एवं विविचचर्यमपि स्थितते नसख्येन सखा मनुभूतवानसि ॥ ५२ ॥

भा॰च॰
१९

ननु भगवन्नस्माकं वयोः सख्यं च त्वं च जानामीति चेत्तत्राह ॥ अपीति ॥ हे सखे मां परमानंदरूपं हित्वा भौमभोग
रतः ॥ स्थानं मनुष्यशरीरं भोगालयं देहं गतः इति चिद्रूपकथनेन स्मारयति ॥ यद्यपि मां न जानासि तथाप्यात्मानं
नामविज्ञातसखं अविज्ञातः कश्चिन्मे सखा आसीदित्येवं किं स्मरसि सखे इति पुंस्त्वनिर्देशः अन्यत्पुंस्त्वस्मर
णाय ॥ सख्यं स्मारयन् ॥ तद्वियोगकृतमनर्थमाह हित्वेति सार्द्धैः षड्भिः ॥ पदं स्थानं ॥ ५३ ॥ हे आर्य पूर्वं यदि णौ मा
नसे हृदये अयनं ययोः ॥ कथं पतेमानसस्य रक्षितो पक्षिणौ भूतौ जातौ ओको गृहं अंतरा विनापि एव ॥ वाशब्द एवा

अपि स्मरसि चात्मानमविज्ञातसखं सखे ॥ हित्वा मां पदमन्विच्छन्भौमभोगरतो गतः ॥ ५३ ॥ हंसावहं च त्वं
चार्य सखायौ मानसायनौ ॥ अभूतामंतरा वौकः सहस्रपरिवत्सरान् ॥ ५४ ॥ स त्वं विहाय मां बंधो गतो ग्रा
म्यमतिर्महीं ॥ विचरन्पदमद्राक्षीः कयाचिन्निर्मितं स्त्रिया ॥ ५५ ॥ पंचाराम नवद्वारमेकपालं त्रिकोष्ठकं
षट्कुलं पंचविपणं पंचप्रकृति स्त्रीधवं ॥ ५६ ॥ पंचेंद्रियार्था आरामा द्वारः प्राणा नव प्रभो ॥ तेजोऽबन्नानि
कोष्ठानि कुलमिंद्रियसंग्रहः ५७

र्थे सहस्रपरिवत्सरान्सहाप्रलयं यावत् ॥ ५४ ॥ हे बंधो ग्राम्येष्वेव मति
र्यस्य स्त्रिया मायया ॥ ५५ ॥ पंचेंद्रियार्था आरामा उपवनानि यस्मिन् ॥ नव द्वाराणि प्राणाश्छिद्राणि यस्मिन् एकः
प्राणः पालो यस्मिन् त्रीणि स्थिमसेजांसि कोष्ठानि भांडागाराणि यस्मिन् ॥ षट् ज्ञानेंद्रियमनांसि कुलानि अभी
ष्टविषयसमर्पकाः वणिजो यस्मिन् ॥ पंच विपणाः कर्मेंद्रियाणि यस्मिन् भूतानि प्रकृतय उपादानका
रणानि यस्य स्त्री बुद्धिरेव च ॥ धवः स्वामी यस्मिन् ॥ ५६ ॥ स एव मे संक्षेपं व्याचष्टे ॥ पंचेंद्रियार्था इति ॥ षट् तत्रं च एक

॥ ५५ ॥ १९

भूतात्मैव स्वव्यया प्रकृतिरुपादानं यस्य॥ स्त्रीधवमित्यस्य व्याख्यानं॥ शक्तिरधीशा यस्मात ईशः सत्रिमर्थः॥५८
स्पृष्टः अभिभूतः अतो न विद्यते श्रुते श्रूले लोके स्मृतिर्यस्य॥५९॥ तत्त्वमुपदिशति॥ न त्वमिति चतुर्भिः सुहृत्पतिः
नवद्वारे पुरे यया रुद्धोसि तस्याः॥६०॥ पुमांसं पूर्वजन्मनि यदमन्यथाः॥ इदानीं सतीं श्रेष्ठां स्त्रियं यन्मन्यसे एष
मा माया॥ यत उभयमपि वस्तुतो नास्ति॥ यस्मादावां हंसौ शुद्धौ नौ आवयोर्वर्त्समार्गं गतिं स्वरूपं पश्य

विपणस्तु क्रियाशक्तिर्भूतप्रकृतिरव्ययः॥ शक्त्यधीशः पुमानत्र प्रविष्टो नावबुध्यते॥५८॥ तस्मिंस्त्वं
रामया स्पृष्टो रममाणोऽश्रुतस्मृतिः॥ तत्संगादीदृशीं प्राप्तो दशां पापीयसीं विभो॥५९॥ न त्वं विदर्भदु
हिता नायं वीरः सुहृत्तव॥ न पतिस्त्वं पुरंजन्या रुद्धो नवमुखे यया॥६०॥ माया ह्येषा मया सृष्टा यत्पुमांसं
स्त्रियं सतीं॥ मन्यसे नोभयं यद्वै हंसौ पश्यावयोर्गतिं॥६१॥ अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भो॥
न नौ पश्यंति कवयः छिद्रं जातु मनागपि॥६२॥ यथा पुरुष आत्मानमेकमादर्शचक्षुषोः॥ द्विधाभूत
मवेक्षेत तथैवांतरमावयोः॥६३॥

६१॥ तत्त्वंपदार्थयोः छिद्रं भेदं का मा ह॥ अहमेव भवान्॥ उपचारं वारयति॥ न चान्य इति अतिहारोपदेशः॥ उ
क्तमभिप्रायः छिद्रमंतरं॥६२॥ नहिं कथमावयोरज्ञानमवेक्षत्तत्रादिधर्मभेदस्तत्राह॥ यथेति॥ आत्मानं देह
मादर्शे निर्मले महांतं स्थिरं चावेक्षेत॥ परस्य च चक्षुषि च तद्विपरीतं विद्योपाधिकृतो धर्मभेद इत्यर्थः॥६३

भा॰ च॰ ९७ तद्व्यभिचारेणेश्वरवियोगेन॥८४॥ कथामात्रमिति बुद्धिं वारयति॥ बर्हिष्मन्निति॥ पारोक्ष्येण राजन्कथामिषेण
तत्त्वरहस्यं॥ यद्यस्मात्॥८५॥ इति चतुर्थे अष्टाविंशः॥२८॥ ऊनत्रिंशे परोक्षार्थव्याख्यानेनोपसंहृतं॥ स्त्रीसंग
तो भवस्त्रीशसंगान्मुक्तिरिति स्फुटं॥१॥ कवयः अध्यात्मविदः अनतिक्लिष्पति चेतनीकरोतीत्यर्थः॥ यद्वा

एवं समानसोऽहं सोऽहं सेन प्रतिबोधितः॥ स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिं॥८४॥ बर्हिष्मन्नेत
दध्यात्मं पारोक्ष्येण प्रदर्शितं॥ यत्परोक्षप्रियो देवो भगवान्विश्वभावनः॥८५॥ इति श्रीभागवते चतु
र्थे अष्टाविंशः॥२८॥ प्राचीनबर्हिरुवाच॥ भगवंस्ते वचोऽस्माभिर्न सम्यगवगम्यते॥ कवयस्त
द्विजानन्ति न वयं कर्ममोहिताः॥१॥ नारद उवाच॥ पुरुषं पुरंजनं विद्याद्यद्व्यनक्त्यात्मनः पुरं॥ ए
कद्वित्रिचतुष्पादं बहुपादमपादकं॥२॥ योऽविज्ञाताहृतस्तस्य पुरुषस्य सखेश्वरः॥ यन्न विज्ञायते
पुम्भिर्नामभिर्वा क्रियागुणैः॥३॥ यदाजिघृक्षन्पुरुषः कार्त्स्न्येन प्रकृतेर्गुणान्॥ नवद्वारं द्विहस्
तांघ्रि तत्रामन्यत साध्विति॥४॥ बुद्धिं तु प्रमदां विद्यान्ममाहमिति यत्कृतं॥ यामधिष्ठाय देहे
स्मिन्पुमान्भुंक्तेऽक्षिभिर्गुणान्॥५॥

व्यनक्ति प्रकटयति ततश्च स्वकर्मणा पुरं जनयतीति पुरंजनपदं व्याख्यातं भवति॥ एकद्व्यादयः पादाय
स्य॥२॥ अविज्ञातशब्देनाहृतं व्याचष्टे उक्तोयः सखेश्वरः अविज्ञातनामनिरुक्तिः यद्यस्मात्पुंभिर्नामादिभिर्यो ९७

पंचवृत्तित्वात्पंचशिराः सर्पइव प्राणः॥८॥ एकादशमहाभटाः एवमेनै एकादशो महाभटो नायक इत्युक्तं
इहइहलं यस्य तन्मनः॥ नवखानि द्वाराणि यस्य॥९॥ शुभमत्स्य वेश्यादेरर्थं संदेपेगारहं॥ यस्तदिंद्रियसं
पुतं स आत्मा तामिंद्रियैर्भिर्वैवहिर्यातीति॥१०॥ पुरः एवं भागेक्ता॥११॥ नेत्रेइति द्वयमिति चद्वाधेति चख
द्योताविषइंद्रियगणाः ज्ञानं कर्मचैवयत्कृतं॥ साग्निमत्ता इत्तयः प्राणाः पंचवृत्तिर्येयोरगः॥१२॥ वृहद्बलं
मनो विद्यादुभयेंद्रियनायकं॥ पंचालाः पंचविषयाः यन्मध्ये नवखं पुरं॥१३॥ अक्षिणी नासिके क
र्णौ मुखं शिश्नगुदाविति॥ द्वेद्वे द्वारौ बहिर्यातिय स्तदिंद्रियसंयुतः॥१४॥ अक्षिणी नासिके वास्यमि
ति पंचपुरः कृताः॥ दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः॥१५॥ पश्चिमे इत्यधो द्वारौ गुदं शिश्न
मिहोच्यते॥ खद्योताविर्मुखी चात्र नेत्रे एकत्र निर्मिते॥१६॥ रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्व
रः॥ नलिनी नालिनी नासे गंधः सौरभ उच्यते॥ घ्राणोवधूतो मुख्यास्यं विपणो वाग्रसविद्रसः॥१७॥
द्योतादीनां व्याख्यानं शेषोऽनुवादः॥ ईश्वरः पुरंजनः॥१८॥ नासे इति व्याख्या एवधुनोतीत्यवधूतो वायुस्तदा
त्मकेनोच्छ्वासेन सहैकस्थानत्वात्॥ घ्राणो वधूतः॥ आस्यमिति व्याख्या रसज्ञ विपणान्वित इत्यत्र रसज्ञ
शब्दनिर्दिष्टस्य रसविदित्यनुवादः॥ रस इति व्यारसनेंद्रियमित्यर्थः॥ विपणो वाग्रस इत्येव पाठः॥ आर्षत्वात्र

भा॰च॰ १८ ग्रंथः अत्र ॥९॥१०॥ ग्रामक इति तस्यानुवादः ॥ ग्रामिणां रतिः तस्य व्याख्यायां अवाय इति ॥१०॥ विषूचीनपदार्था
नुवादो विषूचीरिति ॥ तद्गुणैर्मनोगुणैः तमःसत्वरजोभिः ॥११॥ महिषीयद्यदीहेतमादेरर्थं संगृह्णाति यथा ॥ य
था वुद्धेः स्वप्ने विक्रियते जाग्रति विक्रियते वा इंद्रियाणि परिणमयति तस्या गुणैः रक्तो लिप्तः ॥ आत्मा तस्या

आपणो व्यवहारो त्र चित्रमंधो वहूदनं ॥ पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः ॥१२॥ प्रवृ
त्तिं च निवृत्तिं च शास्त्रं पांचालसंज्ञितं ॥ पितृयानं देवयानं श्रोत्राच्छ्रुतिधराद्व्रजेत् ॥१३॥ आ
सुरीमेढ्रमर्वाक्द्वार्व्यवायो ग्रामिणां रतिः ॥ उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते ॥१४॥
वैशसं नरकं पायुर्लुब्धकोंधौ तु मे शृणु ॥ हस्तपादौ पुमांस्ताभ्यां युक्तो याति करोति च ॥१५॥
अंतःपुरं च हृदयं विषूचिर्मन उच्यते ॥ तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्गुणैः ॥१६॥ य
था यथा विक्रियते गुणाक्तो विकरोति वा ॥ तथा तथोपद्रष्टात्मा तद्वृत्तीरनुकार्यते ॥१७॥
देहो रथस्त्विंद्रियाश्वः संवत्सररयोगतिः ॥ द्विकर्मचक्रस्त्रिगुणध्वजः पंचासुबंधुरः ॥१८॥

वृत्तीः दर्शनस्पर्शनाद्याः केवलमुपद्रष्टैव सन्नवलात् अनुकार्यंति ॥१२॥ आशुगामित्वेन व्याचष्टे संवत्सर
स्येवाप्रतिहतो रयो वेगः प्रतीतो यस्य संवत्सररयः ॥ वस्तुतस्त्वगतिः स्वमशरीरादेर्वुद्ध्या वेव विहृत्तेन
देशांतरगमनाभावात् ॥ पादांतरे संवत्सरश्चातत्तत्कृतं वयश्च ताभ्यां गतिर्यस्येति ॥ द्वीष इति तस्य व्याख्या
नार्देनन्त कृता द्विचक्र इति तस्य व्याख्या ॥ द्विकर्मचक्र इति गुणा द्विज इति त्रिवेणुपदव्याख्या ॥१८॥ ॥ १८

पंचप्रहरणमित्येतद्याचष्टे॥ पंचेंद्रियार्थप्रक्षेपइति॥१९॥ पंचेंद्रियैः सूनाविनोदमिवान्यायेनविषयसेवांक
रोतीति॥ पंचसूनाविनाविनोदकृत॥ अनेनचचारसंगायांतरेणपादिव्याख्यात॥२०॥ परिसंख्यापरिभ्रम
णेन॥ ॥भगितेनजगद्देहेलोकानांतयाय॥२२॥ चराःसंचारिणःभूतानामपसर्गेपीडयामास्त्रशीव्रेम्प

मनोरश्मिर्बुद्धिसूतोरत्त्रोऽर्धे इंद्रकूवरः॥ पंचेंद्रियार्थप्रक्षेपः समपातवरूथकः॥१९॥ आकृतिवि
क्रमोवाह्योभगतस्मांप्रधावति॥ एकादशेंद्रियचमूपंचसूनाविनोदकृत॥२०॥ संवत्सरध्वजवे
गःकालोयेनोपलक्षितः॥ तस्याहानीदृगंधर्वाःगंधर्व्योराञयःस्मृताः॥२१॥ हरंत्यायुःपरिसं
ख्यायषष्ठ्युत्तरशतत्रयं॥ कालकन्याजरासाक्षाल्लोकस्तांनाभिनंदति॥२२॥ स्वसारंजगृहेमृत्युःक्ष
याययवनेश्वरः॥ आधयोव्याधयस्तस्यसैनिकायवनाश्रयाः॥२३॥ भूतोपसर्गाशुरयःप्रज्वारो ॥४९॥
द्विविधोज्वरः॥ एवंबहुविधैर्दुःखैर्दैवभूतात्मसंभवैः॥ क्लिश्यमानःशतंवर्षंदेहेदेहीतमोवृतः॥

स्वदेहेतः रथोवेनोस्यप्रज्वारस्येति॥ प्रशाद्व्याख्यापादांतरेभूतकृताश्रयः॥ अनेनचत्रिभिरुपहवइत्य
त्रिपदंव्याख्यात॥ द्विविधाशीतोष्णरूपेणप्रवेशपभेदात॥२३॥ एवंपरोक्षेनोक्तमर्थंव्याख्यायसर्वकथाता
त्पर्यमाह॥ एवमित्यादिविनामकर्मणोमतेन॥ आधिदैविकदुःखादिभिः क्लिश्यमानोमामाहमितिदेहे॥ श्री

तंवसिष्ठगीतामोक्षोपायेस्थितः ॥४९॥

भा॰ च॰
१९

क्षुत्पिपासादीन्प्राणधर्मान् श्रमधृतादीन् इंद्रियधर्मान् कामादीन्मनोधर्मांश्च निर्गुणोप्यात्मन्यध्यस्य
कामलवान्विषयसुखलेशान् ध्यायन् कर्मकृत् ॥ २५ ॥ ततः किमत आह यदेति द्वाभ्यां ॥ स्वदृक् स्वप्रकाशस्व
भावोपि ॥ २६ ॥ शुक्लं सात्विकं कृष्णं तामसं लोहितं राजसं यथाकर्म तथा जायते ॥ २७ ॥ तदेवाह शुक्लादि द्वाभ्यां

शरीरेंद्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः ॥ शेते कामलवान्ध्यायन्ममाहमिति कर्मकृत् ॥ २५ ॥ यदात्मा
नमविज्ञाय भगवंतं परं गुरुं ॥ पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् ॥ २६ ॥ गुणाभिमानी स तदा क
र्माणि कुरुतेवशः ॥ शुक्लं कृष्णं लोहितं वा यथाकर्माभिजायते ॥ २७ ॥ शुक्लात्प्रकाशभूयिष्ठान्लो
कानाप्नोति कर्हिचित् ॥ दुःखोदर्कान्क्रियायासांस्तमःशोकोत्कटान्क्वचित् ॥ २८ ॥ क्वचित्पुमान्क्वचिच्च
स्त्री क्वचिन्नोभयमंधधीः ॥ देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः ॥ २९ ॥ क्षुत्परीतो यथा दीनः सारमे
यो गृहं गृहं ॥ चरन्विंदति यद्दिष्टं दंडमोदनमेव च ॥ ३० ॥ तथा कामाशयो जीव उच्चावचपथा भ्रमन् ॥ उ
पर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियम् ॥ ३१ ॥

प्रकाशो भूयिष्ठो येषु दुःखमुदर्के उत्तरं फलं येषु ॥ क्रियया आयासो येषु तान् लोहितान् ॥ तमःशोकोत्क
टो येषु तान् कृष्णादिति शेषः ॥ २८ ॥ नोभयं नपुंसकं यथाकर्मगुणं कर्मगुणावनतिक्रम्य ॥ २९ ॥ तेषु देववशेन १९
सुखदुःखे प्राप्नोति ॥ तद्दृष्टांतमाह द्वाभ्यां ॥ क्षुधा परीतो व्याप्तः सारमेयः श्वा दंडं दंडेन ताडनं ॥ ३० ॥ कामया

ननुतर्हिसुखस्यसंभवात्‌दुःखस्यचप्रतीकारसंभवान्नैकांततोदुःखयत्वंतत्राह ॥ दुःखेष्विति ॥ दुःखस्यप्रतीका
रः तावन्नास्तिस्याच्चेत्तस्यप्रतिक्रियातथापित्रिविधदुःखेष्वमध्येएकतरेणापिदुःखेनात्यंतव्यवच्छेदोनास्तियो
गोनास्ति ॥ २१ ॥ प्रतिक्रियाणामपिदुःखरूपत्वादिति सदृष्टांतमाहयथाहीति ॥ २२ ॥ दुःखस्यमूलभूतानि
तत्कर्माणिप्रतिक्रियादिकर्मभिर्नैवनिवर्त्ततेइत्याह ॥ नैकांततः अत्यंतसवासनंकेवलंज्ञानरहितं ॥ अवि

दुःखेष्वेकतरेणापिदैवभूतात्महेतुषु ॥ जीवस्यनव्यवच्छेदःस्याच्चेत्तत्तत्प्रतिक्रिया ॥ २१ ॥
यथाहिभारवान्भारंशिरसागुरुमुद्वहन् ॥ तंस्कंधेनसआधत्तेतथासर्वाःप्रतिक्रियाः ॥ २२ ॥ नै
कांततःप्रतीकारःकर्मणांकर्मकेवलं ॥ द्वयंह्यविद्योपसृतंस्वप्नेस्वप्नइवानघ ॥ २३ ॥ अ
र्थेह्यविद्यमानेपिसंसृतिर्ननिवर्तते ॥ मनसालिंगरूपेणस्वप्नेविचरतोयथा ॥ २४ ॥ अ
थात्मनोर्थभूतस्ययतोनर्थपरंपरा ॥ संसृतिस्तद्व्यवच्छेदोभक्त्यापरमयागुरौ ॥ २५ ॥

यथाउपसृतंप्राप्तंअतोऽविद्योपसृतंनिवर्त्यनिवर्तकंतथेतिभावः ॥ अत्रदृष्टांतः स्वप्नेदृष्टं प्रबोधंविनातं
स्वप्नमयंतेनप्रतिकरोतीत्यर्थः ॥ २३ ॥ ननुतर्ह्यज्ञानविलसितत्वेनसंसृतिहेतोर्देहादेरप्यसत्वात्किंतन्नि
वर्तनप्रयासेनतत्राह अर्थेहीति ॥ लिंगरूपेणोपाधिभूतेनतद्वत्संसृतिप्रकारमुक्त्वातन्निवृत्तिप्रकार
माह ॥ अथतस्मात्‌अर्थभूतस्यैवात्मनः यतोऽज्ञानात्मनोऽनर्थपरंपरारूपासंसृतिर्भवति ॥ तस्यव्यवच्छेदे

ननु॥ संसृतिनिवृत्तिर्वैराग्यपूर्वकात्॥ ज्ञानाद्भवनतुभक्त्यातरतिशोकमात्मवित्‌इत्यादिश्रुतेः॥ तत्राह
वासुदेवसध्रीचीनेनसमीचीनेनप्रकारेण॥३७॥ ननुसौमहाबलोभक्तियोगः कथंस्यादत आह॥ सतत्र
भा॰च॰ च्युतस्यकथायामाश्रितःप्रवर्त्तमानोचिरात्स्यात्॥ कस्यस्यात्॥ तत्राह शृण्वतः श्रद्दधानस्य॥३८॥ कुतःस्यात्
११ तत्राहयत्रेति भगवतोगुणानुकथनेश्रवणेचव्यग्रमसतंचेतोयेषांते॥३९॥ ननुसाधुसंगंविनाप्यहमेवह

वासुदेवेभगवतिभक्तियोगः समाहितः॥ सध्रीचीनेनवैराग्यंज्ञानंचजन
यिष्यति॥३७॥ सोचिरादेवराजर्षेस्यादच्युतकथाश्रयः॥ शृण्वतःश्रद्दधा
नस्यनित्यदास्यादधीयतः॥३८॥ यत्रभागवताराजन्साधवोविशदाशयाः
भगवद्गुणानुकथनश्रवणव्यग्रचेतसः॥३९॥ तस्मिन्महन्मुखरितामधुभि
च्चरित्रपीयूषशेषसरितःपरितःस्रवंति॥ तायेपिबंत्यवितृषोनृपगाढकर्णै
स्तान्नस्पृशंत्यशनतृड्भयशोकमोहाः॥४०॥

रिचिंतनादिनाभक्तिर्भावेत्याशंक्याहद्वाभ्यां॥ तस्मिन्स्थानेमहद्भिर्मुखरिताः कीर्तितामधुभिदश्चरि
त्रमेवपीयूषंतदवशिष्यतइतिशेषोयासांसुश्रमारांशरहितशुद्धामृतवाहिन्यइत्यर्थः॥ अवितृषः॥
अलंबुद्धिशून्याःसंतः गाढैः सावधानैः कर्णैः येताःसरितः पिबंतिसेवंतेअशनशब्देनदुर्लभ्यते ११
अशनादेयः॥ ताननस्पृशंतिभक्तिरसिकान्नबाधंतेइत्यर्थः॥४०॥

सत्संगमंतरेणानहपमेवकथाचिंतनादावालादिनारभ्यावेशाभावाच्चतत्त्विपासायमिभूतस्यभक्तिर्नसं
भवतीत्याह ॥ एतैरिति ॥ ४१ ॥ भगवदनुग्रहमंतरेणातु नकस्यापिज्ञानसंभवइतिवैतन्यत्याहचत
र्भिः प्रजापतिर्ब्रह्मा ॥ ४२ ॥ मंदतात्रहेनारदोऽर्ते पेक्षाते ॥ ४३ ॥ वाचांपतयोपितयोविद्यासमाधिभिरुपा
यैः पश्यंतोविचिन्वंतोपिपश्यंतेसर्वंसाक्षिणंपश्यंति ॥ ४४ ॥ ऊतत्पतथाह ॥ शब्दब्रह्मणिवेदे ॥ उरु

एतैरुपद्रुतोनित्यंजीवलोकः स्वभावजैः ॥ नकरोतिहरेर्नूनंकथामृतनिधौरतिं ॥ ४१ ॥ प्रजापति
पतिः साक्षाद्भगवानगिरिशोमनुः ॥ दक्षादयः प्रजाध्यक्षानैष्ठिकाः सनकादयः ॥ ४२ ॥ मरीचिरत्र्य
गिरसौपुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठइत्येतेमदंताब्रह्मवादिनः ॥ ४३ ॥ अद्यापिवाचस्पतय
स्तपोविद्यासमाधिभिः ॥ पश्यंतोपिनपश्यंतिपश्यंतंपरमेश्वरं ॥ ४४ ॥ शब्दब्रह्मणिदुष्पारेचरंतउरु
विस्तरे ॥ मंत्रलिंगैर्व्यवच्छिन्नंभजंतोनविदुःपरं ॥ ४५ ॥ यदायस्यानुगृह्णातिभगवानात्मभावितः
सजहातिमतिंलोकेवेदेचपरिनिष्ठिताम्

विस्तारेयस्यअर्थंतोपिपारशून्येतस्मिन्वर्तमानाः ॥ मंत्राणांलिंगैर्वज्रहस्तत्वादिगुणयुक्तविविध
देवताभिधानसामर्थ्यैः परिच्छिन्नमेवेंद्रादिरूपंतत्तत्कर्मयद्देशेणभजंतः परमेश्वरंनविदुः ॥ ४५ ॥ तर्हिसर्वः
कोनामकर्मोपायान्हित्वापरमेवभजेदत्तआह ॥ यदायमनुगृह्णाति ॥ अनुग्रहे हेतुः ॥ आत्मनिभा
वितः सन्तत्तदालोकेलोकव्यवहारेवेदेचकर्ममार्गेपरिनिष्ठितांमतिंत्यजति ॥ ४६ ॥

भा॰च॰
१११

अर्थकाशिषु परमार्थतेव च प्रकाशमानेषु पुरुषार्थबुद्धिमाकृथाः॥ प्ररोचनाय केवलं श्रोत्रप्रियेषु नस्पृष्टं वा-
स्तवैः॥४४॥ ननु वेदेन स्वर्गादिसाधनत्वेनोक्तानि कर्माणीति वेदवादिनो वदंति॥ कथमस्पृष्टवस्तुष्विति उच्यते॥
तत्राह॥ येषूक्तधियो मलिनबुद्धयः॥ सकर्मकं कर्मपरं वेदमाहुस्ते तत्त्वविदः श्रुवेदज्ञाः यत्र तेषां स्वरूपभूत
लोकमात्मतत्त्वं वेदतात्पर्यगोचरं न विदुः॥ यत्र देवोस्ति॥४५॥ तं तमहामूर्खत्वात् आस्तीर्येति॥ स्वहृदयात्

तस्मात्कर्मसु बर्हिष्मन्नज्ञानादर्थकाशिषु॥ मार्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु॥४६॥ स्वं लो-
कं न विदुस्ते वै यत्र देवो जनार्दनः॥ आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः॥४७॥ आस्तीर्य दर्भैः प्राग-
ग्रैः कार्त्स्न्येन क्षितिमंडलं॥ स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परं॥४८॥ तत्कर्म हरितोषं यत्सा वि-
द्या तन्मतिर्यया॥ हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः॥ तत्पादमूलं शरणं यतः क्षेमो नृणामि-

वहुधम्रवधात्॥ मानी महाधृष्टत्वादहमस्मीत्यहंकारो यतः स्तब्धः अविनीतः सत्कर्म यन्नावैषि परं विद्यास्वरूपं तच्च न वे-
त्सि॥४९॥ नारदः स्वयं कृपया तत्त्वं निरूपयति॥ हरिं तोषयतीति हरितोषं यत्र देवकर्मघयात स्मिन् हरौ मा-
तिर्मतिर्भवति सैव विद्या महाफलत्वात्॥ अतएव पत्नीयो हरेः परमफलत्वं च दर्शयन्नाह द्वाभ्यां॥ हरिर्देहभृ-
तामात्मा ईश्वरश्च॥ तत्र हेतुः॥ स्वयं स्वातंत्र्येण प्रकृतिः कारणमन्येषां तत्पादमूलमेव शरणं आश्रयः यतः

१११

नचतद्भजनेश्रमभजनदेवदुःखंभयंवेत्याह॥ सइति॥ इतियोवेदसएवविद्वान्॥ सगुरुरेवहरिस्तु॥ ५॥ उ
क्तमुपसंहरति॥ एवंभवतः प्रश्नः संछिन्नः परिहृतः॥ नदेवमात्मनोवंधमोक्षप्रकारेकथ्यारूपेणकथि
तेपिनातिनिर्विण्णचित्तशुश्रूषामनश्रतीत्यमाणंसंते॥ ततस्तमेवमहाभयप्रकंपितासकलगात्रग
हाविष्टामपितंहरिशरणरूपकमाह॥ अत्रेति॥ वदतोमेवचः शृणु॥ ५॥ त्वइमंलयंचरतीतितथ्यातं

सवैप्रियतमस्त्वात्मायतोनभयमण्वपि॥ इतिवेदसवैविद्वान्योविद्वान्सगुरुर्हरिः॥ ५॥ ना
रदउवाच॥ प्रश्नएवंहिसंछिन्नोभवतः पुरुषर्षभ॥ अत्रमेवदतोगुह्यंनिशामयसुनिश्चितं॥ ५॥
त्वंचरंसुमनसांशरणेमिथित्वारक्तंषट्पदगणामसुलब्धकर्णं॥ अग्रेवृकानसुतृपो
विगणय्ययांतंपृष्ठेमृगमृगयलुब्धकवाणभिन्नं॥ ५२॥

अत्रसूक्त॥ सुमनसांपुष्पाणांशरणेआश्रयेवाटिकायांमिथित्वामिथः परस्परंस्त्रियासहमिलि
तातत्रैवरक्तमानसःकषट्पदोयोभ्रमरः तेषांसामसुगीतेषुलब्धःकर्णोयस्तं॥ परेषामसुभिर्हृतैः॥
हीयानसूत्तर्यपतीत्यसुतृपः॥ नानविगणय्यचगणयित्वा॥ लुब्धकवाणेनभिन्नमृगमृगयप्र।

श्लोकं प्रस्तुतं योजयन्व्याचष्टे ॥ सुमनोभिः समानो यर्मः परिणामविरसत्वं यासां स्त्रीणां ॥ मिथिलेत्यस्य व्याख्या
मिथुनीभूय स्त्रीभिः सहेति शेषः ॥ रक्तमित्यस्य व्याख्या तास्वभिनिवेशितं मनो येन अप्रस्तुतपरइत्यस्य व्याख्या ॥
भा॰ च॰ ११२ अप्राप्तर्हरत इति ॥ यांतमित्यस्य व्याख्या ॥ विहरंतमिति अंतः नालिकायां गूढेन शरेण पराविध्यति हृद्देवता

सुमनः सधर्मीणां स्त्रीणां शरणाश्रये पुष्पमधुगंधवत् तद्इतमं कामुककर्मविपाकजं कामसु
खलवं जैन्द्रोपस्यादिविचिंतितं मिथुनीभूय तदभिनिवेशितमनसं षडेन्द्रियाणां सामग्रीतवदति मेनो
हरवनितादिजनालापेषु तितरामतिप्रलोभितकर्णमयेऽन्यत्कदृथवदात्मनअप्राप्तर्हस्तो होरात्रा
तात्कालविशेषानविगणय्यगृहेषु विहरंतं यद्वतः परोदंमनवप्रचुतोलुब्धकः स्मृतांतोंतः शरेण
यमिह्यपराविध्यतितसिममात्मानमहोराजन्भित्रद्दयंपरश्चुमर्हसीति ॥५४॥ सत्वंविचरस्यमगाचे
ष्टितमात्मनेनोत ॥ चित्तं नियच्छ हृदि कर्णपुंजनी च वित्ते ॥ जहांगनाश्रममसत्तमस्थयमार्थप्राणीहितं
सशरणं विरमक्रमेण ॥५५॥

इयति ॥५४॥ उपदेशं सारमाह ॥ सइति ॥ विचरस्व विचार्य्य ॥ अंतर्हृदि चित्तं कर्णयोर्धुनीनदोसिववहित्तुतिं चित्ते
नियच्छ ॥ एतत्वसर्वैंद्रियोपलक्षणार्थं गृहाश्रमं च जहि ॥ कीदृशमसज्जमानामतिकाम्नकानां यांनिस्पृहा ११२
नितेषां गाथा वार्त्ता यस्मिन् जीवानां शरणमीश्वरं ॥ एवंक्रमेण सर्वतो विरम ॥५५॥ ॥

अथोत्तरं इष्टुं पूर्वोक्तमर्थमनुवदति ॥ अतमन्वीक्षितं न विचारितं ब्रह्मन्नारद ॥ एतत्तदुक्तमात्मतत्त्वउपा
ख्यायायेमेममकर्मोपदेशार्थं आचार्यास्तेन जानंति ॥ ५८ ॥ अतस्तत्कृतउपाख्यायकृतः तद्वाक्यविरोधे
नात्मतत्त्वे संभावनारूपो महान्संशयः संछिन्नः तथा ॥ अत्र तत्र कश्चिन्संशयो वर्जते ॥ यत्रेंद्रियवृत्ती
नामप्रवृत्तेर्मुक्तिरिति ॥ ५७ ॥ संशयमाह द्वाभ्यां ॥ कर्माणि येन करोति तमेवं विहाय ॥ अमुत्र लोकांतरं क

राजोवाच ॥ अतमन्वीक्षितं ब्रह्मन्भगवान्यदभाषत ॥ नैतज्जानंत्युपाख्यायाः किंवद्युर्विदुर्यदि ॥ ५८ ॥ संशयोत्र तु मे विप्र संछिन्नस्तत्कृतो महान् ॥ ऋषयोपि हि मुह्यंति यत्र नेंद्रियवृत्तयः ॥ ५७ ॥ कर्माण्यारभते येन पुमानिह विहाय तं ॥ अमुत्रान्येन देहेन जुष्टानि स कृदश्नुते ॥ ५८ ॥ इति वेदविदां वादः श्रूयते तत्र तत्र ह ॥ कर्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते ॥ ५९ ॥

मोंपस्थापितेनान्येन देहेन जुष्टानि उपभुक्तानि जीवोश्नुते प्राप्नोति ॥ ५८ ॥ इति वादः श्रूयते ॥ प्राप्यपुण्य
कृतांल्लोकानिति शरीरजैः कर्मदोषैः याति स्थावरतां नरः इति तथा प्रोक्तं वेदेशास्त्रेतीरस्वभूपातिति
तिपतत्त्वकर्त्तृभोक्तृदेहभेदेन कृतनाशाकृताभ्यागमप्रसंगात्प्रसंगच्छत इति भावः संशयांतरमाह ॥
प्रोक्तं वेदोक्तं कर्म कृयते जनैः ॥ तच्चानंतरक्षणएव परोक्षं ॥ अदर्शनमेवप्रकाशते ॥ अतः कर्मणोनष्टत्वा

भा॰ च॰
११३

प्रथमस्योत्तरं येनैवेति ग्रन्थवधानेन ॥ कर्ताभोक्तृदेहविच्छेदं विनास्थूलदेहनाशेपि मनः प्रधानस्य लिंगदेहस्याना
शात्रोक्तदोषप्रसंगइत्यर्थः ॥ ८ ॥ लिंगदेहविशिष्टस्य भोक्तृत्वे सप्रदृष्टांतेन स्पष्टयति शयानमिमं जाग्रद्देहस्य सं-
तस्य संतं जीवंतं उत्सृज्य तदभिमानं त्यक्त्वा ॥ आत्मनि मनसि संस्काररूपेणाहितकर्मयथा भुंक्ते ॥ तादृशेन शया
नदेहसदृशेन कर्मोपस्थापितेन देहेनास्येन वा पश्वादिदेहेन तथा लोकांतरेपीति भावः ॥ ८ ॥ ननु भवतु नाम
लिंगविशिष्टानेन दृष्टांतेन भोक्तृत्वं कर्तृत्वं तु दानप्रतिग्रहादिषु स्थूलदेहविशिष्टस्यैव दृश्यते तत्राह ॥ ममे

ना र द उवाच ॥ येनैवारभते कर्म तेनैवामुत्र तत्समान ॥ भुंक्ते ह्यव्यवधानेन लिंगेन मनसा स्वयं ॥ ८ ॥ श
यानमिमं तत्र ज्वस्थं संतं शुह्वेषो यथा ॥ कर्मात्मन्याहितं भुंक्ते तादृशेनेतरेण वा ॥ ८ ॥ ममैति मनसा
यद्यदसावहमिति ब्रुवन् ॥ गृह्णीयात्तत्पुमान् राद्धं कर्म येन पुनर्भवः ॥ ८ ॥ यथानुमीयते चित्तमुभयै
रिंद्रियैर्हितैः ॥ एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः ॥ ८ ॥

ति ॥ ममैते पुत्रादयः ॥ असावहं ब्राह्मणः
इति ब्रुवन् ॥ मनसा यद्यद्देहं गृह्णीयात्ततो देहाद्राद्धं कर्म पुमान् गृह्णीयात् ॥ येन कर्मणा पुनरहंकारग्रही
तेन पुनर्भवो भवति ॥ अन्यथा जन्मानुपपत्तेः ॥ अतोभिमंतृतन्मनोविशिष्टस्यैव कर्तृत्वं अभिमानविषयस्य तु
देहस्य पुत्रादिदेहवत् द्वारमात्रत्वमिति भावः ॥ ८ ॥ तदुक्तं कर्मणोन दृष्टत्वात्कथममुत्रभोगः इति तत्राह यथेति
उभयैर्ज्ञानकर्मरूपैरिंद्रियाणामीहितैः कदाचित्कर्मप्रवृत्तिभिश्चित्तमनुमीयते तस्यापि सर्वेंद्रियसंबंधेषु
युगपत्ज्ञानानुत्पत्तेः ॥ तदुम्मत्वादेन युगपत्ज्ञानानुत्पत्तिर्मनसो लिंगमिति ॥ एवं चित्तवृत्तिभिः पूर्वदेहजं

॥ ८६ ॥

११२

यतोऽपि क्व मिलन्ति तस्मादाह ॥ नानुभूतमिति द्वाभ्यां ॥ अनेन वर्त्तमानेन देहेन क्व च कुत्रचिदपि यद्यन्नानुभूतं
अननुभूतं ॥ अदृष्टं चाश्रुतं यद्रूपं पदार्थात्मकं यादृक् च यत्प्रकारं च ॥ तत्कदाचित्स्वप्नमनोराज्यादिषु ॥ आत्ममन
सि उपलभ्यते ॥९०॥ तेन देहेन नाशस्य लिंगिनो वासनाश्रयस्य जीवस्य तादृशं तदनुभवादि युक्तं ॥ पूर्वदेहसंभ
वे ॥ अद्धा स निश्चयेन मम सखे ॥ न चाननुभूतोऽर्थो मनः स्पृष्टुं मनसि स्फुरितुमर्हति ॥९१॥ किंच मनो हि सर्वं पूर्व

नानुभूतं क्वचानेन देहेनादृष्टमश्रुतं ॥ कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि ॥९०॥ ते
नाशस्तादृशं राजन्लिंगिनो देहसंभवे ॥ अद्धा त्वाननुभूतोऽर्थो न मनः स्पृष्टुमर्हति ॥९१
मन एव मनुष्यस्य पूर्वरूपाणि शंसति ॥ भविष्यतश्च भद्रं ते तथैव न भविष्यतः ॥९२॥

पराणि शुभाशुभनिमित्तानि शरीराणि ज्ञापयतीत्याह ॥ मन एवेति ॥ भद्रं ते इति ॥ सम्बोधनार्थमाशि
षामभिनन्दति ॥ भविष्यतः उद्भवं प्राप्स्यतः ॥ न भविष्यतः ॥ नीचत्वं प्राप्स्यतोऽपि भावीनि रूपाणि ॥ शंसति मन
एवोदार्यकार्पण्यादिवृत्तिभिः ॥ एवं मय्येवमेवासीत् ॥ पश्चादप्येवं भविष्यतीति ज्ञापयतीत्यर्थः ॥९२

भा॰ च॰ ११७

नन्नु॥ कदाचिद्दर्शनानर्हमपि स्वप्ने प्रतीयते यथा पर्वताग्रे समहः॥ दिवा नक्तमापि स्वशिरः छेदस्यादित्याह॥ अदृष्ट
मिति॥ अन्यदेशाश्रयं सममदृष्टादिकं पर्वताग्रे॥ निशाश्रयं नक्तमादिकं दिवाश्रयं गादिक्रियाश्रयं स्वशिरः छेदनाश्रयं निद्रा
दिदोषेणाहिमतीपतनस्त्यपिमं तस्यं परस्यापि तदनुपपतेस्तल्पतादिति भावः स्वप्ने स्वानुभवस्य एवं जन्यत्वमेमंगीकुर्व

अदृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्यते॥ यथा तथानुमंतव्यं
देशकालक्रियाश्रयं॥ ८७॥ सर्वक्रमानुरोधेन मनसेंद्रि
यगोचराः॥ आयांति वर्गशो यांति सर्वे समनसो जनाः॥ ८८॥

तोऽपि विपरीत स्वमतानेयद्धिकर्मणो जातत्वेन निद्रादोषप्राबल्यमेव॥ तेनाप्याश्रयणीयमिति भावः॥ ८७॥
नन्नु दरिद्रः क्वचिदात्मानं महाराजं पश्यति राजा चादरिद्रमात्मानं पश्यति॥ तत्कथमसंभावितं संगच्छेत॥ त
त्राह सर्वमिति॥ आयांति भोग्यत्वेन प्रादुर्भवंति॥ यांति च भोगानंतरं यदि कश्चित् तन्मना भवेत्॥ तर्हि एवं न स्यात्॥ न
न्वेतदस्तीत्याह सर्वे समनस इति॥ अतः सर्वेषां समनस्कत्वात् मनसि च सर्वार्थानां क्रमेणाप्रवेशान्नासंतानदृष्टगो

वृतः॥ कस्यापि कश्चिदस्तीत्यर्थः॥ ८८॥

तदेवं सर्वैरपि सर्वैः पदार्थैः क्रमेणादृश्यं तत्रोक्तं ॥ इदानीं युगपदपि सर्वदर्शनं कदाचिद्भवतीत्याह ॥ मय्येकनिष्ठे भ
गवत्यात्मवर्तिनि ॥ भगवद्ध्यानपरे मनसि ॥ इदं विश्वमुपरज्य मेघो गगनमिव प्राप्यावभासते प्रतीतिर्न देशस्यापि क
दाचित्य नीतो दृष्टान्तः ॥ चन्द्रमसि उपरज्यते तमः राहुः यद्वदिदं शुद्धे मनसि सर्वविषयस्फुरणं योगिभिर्दृष्टमिति
प्रसिद्धं ॥ ९६ ॥ तदेवं स्थूलदेहनाशेऽपि लिंगदेहस्यानाशादस्य कर्ता भोक्तेति दोषो नास्तीत्युक्तं ॥ तत्रैवं शंकते
ननु लिंगदेहस्य स्थूलदेहं विना कर्तृत्वभोक्तृत्वे ॥ ननु केवलस्य तत्र कदाचित्स्थूलदेहाभावे ॥ जीवस्य कर्तृत्वभो

मय्येकनिष्ठे मनसि भगवत्यात्मवर्तिनि ॥ तमश्चन्द्रमसीवेदमुपरज्यावभासते ॥ ९६ ॥ ना
हं ममेति भावोऽयं पुरुषे व्यवधीयते ॥ यावद्बुद्धिमनोऽक्षार्थगुणव्यूहो ह्यनादिमान् ॥ ९७ ॥ सु
प्तमूर्छोपतापेषु प्राणायनविघातकः ॥ नेहतेऽहमिति ज्ञानं मृत्युप्रज्वारयोरपि ॥ ९८ ॥

नरह ॥ ९ ॥

क्तृत्वभोक्तृत्वाभावान्मुक्तिः ॥ प्रसङ्गे तत्तत्राह ॥ अहं ममेति भावः ॥ स्थूलदेहसंबंधः ॥ पुरुषे जीवे न व्यवधीयते
न विच्छिन्नो भवति ॥ किं पर्यन्तं बुद्ध्यादीनां व्यूहः परिणामो लिंगं यावदस्ति अनादिमान् ॥ ९७ ॥ स्वापादावहंका
राद्यभावान्न हि च्छेद इत्याशंक्याह द्वाभ्यां ॥ सुप्त्यादिषु उपतापः इष्टवियोगादिदुःखं ॥ तेषु अहमिति ज्ञानं अहंका
रः नेहते प्रकाशः प्राणायनानीन्द्रियाणां विघातात् ॥ इंद्रियैरिदंकारास्पदवस्त्वग्रहणादहंकारः स्फुरति

अयोपोक्षकल्पात् अस्मत्प्रणीतात् आग्नायनानामितिशेषः ॥ पूर्वमलक्षणास्यदेकादशविधंप्रकारंदशेंद्रियैः स्कंदलिंग
महंकरणं ॥ तत्रदृश्यतेगर्भादावितिशेषः ॥ सतोप्यनभिव्यक्तौदृष्टांतः ॥ कुहूसमावास्यायांचंद्रमसोलिंगमि
भा॰च॰ ११५ व ॥ १२ ॥ तस्मादहंकारस्यस्थूलदेहस्याविच्छेदादहस्तभूतार्थाभावेपिसंसृतिनिवृत्तिर्नास्तीत्याह ॥ अर्थेहीति
अ ॥ यावल्लिंगस्यस्थूलदेहाविच्छेदात्संसारानिवृत्तिरित्येतत्प्रपंचयति ॥ एवमितिसार्द्धैस्त्रिभिः ॥ ५ ॥ पंचविधंपंच

गर्भेवास्येप्यपोक्षकल्पादेकादशविधंतदा ॥ लिंगंनदृश्यतेयूनः कुह्वांचंद्रमसोयथा ॥ १२ ॥ अर्थेह्यविद्य-
मानेपिसंसृतिर्ननिवर्तते ॥ ध्यायतोविषयानस्यस्वप्नेनर्थागमोयथा ॥ १३ ॥ एवंपंचविधंलिंगंत्रिवृत्
षोडशविस्तृतं ॥ एषचेतनयायुक्तोजीवइत्यभिधीयते ॥ १४ ॥ अनेनपुरुषोदेहानुपादत्तेविमुंचति ॥ ह
र्षंशोकंभयंदुःखंसुखंचानेनविंदति ॥ १५ ॥ यथातृणजलौकैवंनापयात्यपयातिच ॥ नत्यजेन्म्रियमा-
णोपिप्राग्देहाभिमतिंजनः ॥ १६ ॥ यावदन्यंनविंदेतव्यवधानेनकर्मणा ॥ मनएवमनुष्येंद्रभूतानांभव-
भावनम् ॥ १७ ॥

तन्मात्रात्मकंत्रिवृत्त्रिगुणंषोडशविकारात्मनाविस्तृतं ॥ १४ ॥ नन्वेवंकंदेहंविसृज्यदेहांतरप्रवेशात्पूर्वमदेहतास्या ११५
देवेत्यतआह यथेति ॥ नापयातिपूर्वतृणंस्यात्यागादपयातिचतृणांतरग्रहणात् ॥ तथानत्यजेत् ॥ अन्यदेहंतत्क
र्मणाप्राप्तदेहारंभकाणांव्यवधानेनविच्छेदेनसमाप्याप्रकरणार्थमुपसंहरति ॥ मनएवेति ॥ भवभावनंसंसारहे

कथंसतीति॥तदाह॥यदेति॥चरितान्उपभुक्तान्॥यतःकर्मणिसति॥नत्वसंगस्यकृतःकर्मेतत्याह॥अविद्या
यांसत्यांअनात्मनोदेहादेःकर्मणिबंधोभवति॥७८॥विश्वस्थित्यादयोयतोहरेर्भवंति॥७९॥हंसयोर्जीवे
श्वरयोःमुज्ञानादिरूपेतिप्रजाणामादेशंमंत्रणामग्रेकथयित्वा॥८०॥८२॥८३॥आत्मशौचंमनःशोधकं

यदातैःचरितान्ध्यायन्कर्माण्याचिनुतेसकृत॥सतिकर्मण्यविद्यायांबंधःकर्मण्यनात्मनः॥७८
अतस्तदपवादार्थंभजसर्वात्मनाहरिं॥पश्यंस्तदात्मकंविश्वंस्थित्युत्पत्त्यप्ययायतः॥७९॥मैत्रेयउवा
च॥भागवतमुख्योभगवान्नारदोहंसयोर्गतिं॥प्रदर्श्यह्यमुमामंत्र्यसिद्धलोकंततोगमत॥८०॥प्रा
चीनवर्हिःराजर्षिःप्रजासर्गाभिरक्षणे॥आदिश्यपुत्रानगमत्तपसेकपिलाश्रमं॥८१॥तत्रैकाग्रमनाः
वीरोगोविंदचरणांबुजं॥विमुक्तसंगोनुभजन्भक्त्यातत्साम्यतामगात॥८२॥एतदध्यात्मपारोक्ष्यं
गीतंदेवर्षिणानघ॥यःश्रावयेद्यःशृणुयात्सलिंगेनविमुच्यते॥८३॥एतन्मुकुंदयशसाभुवनंपु
नानंदेवर्षिवर्यमुखनिःसृतमात्मशौचं॥यःकीर्त्यमानमधिगच्छतिपारमेष्ठ्यंनास्मिन्भवेभ्रमति
मुक्तसमस्तबंधः॥८४॥अध्यात्मपारोक्ष्यमिदंमयाधिगतमद्भुतं॥एवंस्त्रियाश्रमःपुंसःछिन्नोमु
त्रचसंशयः॥८५॥इतिश्रीभागवतेचतुर्थस्कंधेएकोनत्रिंशोध्यायः॥२९॥॥

पारमेष्ठ्यंसर्वोत्कृष्टफलदं॥८४॥स्त्रीबुद्धिलक्षत्सहितस्याश्रमोहंकारः॥छिन्नोभवति॥अमुत्रकर्मफ
लभोगःकथमितिसंशयःछिन्नःछिन्नः॥८५॥इतिभावार्थदीपिकायांचतुर्थस्कंधेएकोनत्रिंशोध्यायः॥२९

प्रसंगात्संचभिःप्रोक्तंहृतंप्राचीनवर्हिषः॥वापितेचपुनर्हृत्याःप्रस्तुतंचप्रचेतसां॥१॥ततस्त्रिंशेनपत्त्रूणाद्रीशाल्र।
अवराप्तततः।आगस्यवांत्सीमुद्गालराज्यंचक्रुरितीष्यते॥हरिंप्रतोष्यकांसिद्धिमापुःहेवाहंसत्यकस्योविदि
भा॰च॰ ११९ प्रायोर्हहस्यतेमैत्रेयःशिष्यइतिज्ञातव्यं॥तेयरुच्छ्यागिरित्रिंप्राप्यतस्यैववैकुंठस्यनाथप्रियगिरिशस्यपार्श्ववर्ति

विदुरउवाच॥येत्वयाभिहिताब्रह्मन्सुताःप्राचीनवर्हिषः॥तेरुद्रगीतेनहरिंसिद्धिमापुःप्रतोष्य
कां॥१॥किंवार्हस्पत्येहपरत्रवाथकैवल्यनाथप्रियपार्श्ववर्तिनः॥आसाद्यदेवंगिरिशंयदृच्छया
प्रापुःपरंनूनमथप्रचेतसः॥२॥मैत्रेयउवाच॥प्रचेतसोंतरुदधौपितुरादेशकारिणः॥जपयज्ञे
नतपसापुरंजनमतोषयन्॥३॥दशवर्षसहस्रांतेपुरुषस्तुसनातनः॥तेषामाविरभूत्कृच्छ्रंशां
तेनशमयन्रुचा॥४॥सुपर्णस्कंधमारूढोमेरुशृंगमिवांबुदः॥पीतवासामणिग्रीवःकुर्वन्विति
मिरादिशः॥५॥काशिष्णुनाकनकवर्णविभूषणेनभ्राजत्कपोलवदनोविलसत्किरीटः॥अष्टायु
धैरनुचरैर्मुनिभिःसुरेंद्रैरासेवितोगरुडकिन्नरगीतकीर्तिः॥६॥

नः॥तदनुग्रहीताःसंतोनूनंपरंमोक्षंप्रापुरेव॥ततःएवंतर्हिइहअथवापरत्रकिंप्रापुः॥३॥रुद्रगीतजपरूपेण
यज्ञेनतपसाचपुरंजनंहरिंतेषांकृच्छ्रंतपःक्लेशंरुचाकांत्याशमयन्शांतेनसमस्तेनवपुषाआविर्भूतः॥४॥
सुपर्णस्कंधमारूढःरुद्रसादिनावर्हिष्मतःसुतानाहइतिरत्तीयेनात्वषः॥५॥कनकमयेनवर्णावताविभू
षणेनभ्राजमानंकपोलंवदनंयस्यअष्टभिरायुधैः॥गरुडएवकिन्नरैःतेनपदाःसनैर्गीताकीर्तिर्यस्य॥६ ११९

पीनांसश्चायताश्चैषां भुजास्तेषां मंडले समूहः तन्मध्यस्थितया लक्ष्म्यास्पर्द्धमानाः श्रीः शोभा यस्याः ॥ तथा व
नमालया परिहृतश्चायं पुरुष आह ॥ पर्जन्यस्वनाद्दूरं वहतेनाद्ये यस्मात्तया वाचा सघृणोऽवलोको यस्य
॥१॥ यूयं मनोहरगणैधं सौहार्देन हेतुना ॥ अन्यथ कथं मोघेषां संबोधने वः परस्परं सौहृदेन तुष्टोऽहं ॥२॥ भूतेषु

पीनायताष्टभुजमंडलमध्यलक्ष्म्यास्पर्द्धिश्रिया परिहृतो वनमालयाद्यः ॥ बर्हिष्मतः पुरुष आह
सुतान्प्रपन्नान्पर्जन्यनादरुतया सघृणावलोकः ॥१॥ श्रीभगवानुवाच ॥ वरं वृणीध्वं भद्रं वो यूयं
मे नृपनंदनाः ॥ सौहार्देनापृथग्धर्मास्तुष्टोऽहं सौहृदेन वः ॥२॥ यो नुस्मरति संध्यायां युष्माननुदि
नं नरः ॥ तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदं ॥३॥ ये तु मां रुद्रगीतेन सायं प्रातः समाहिताः ॥ स्तु
वंत्यहं कामवरान्दास्ये प्रज्ञां च शोभनां ॥४॥ यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः ॥ अथो व उ
शती कीर्तिर्लोकाननुभविष्यति ॥५॥ भविता विश्रुतः पुत्रोऽनवमो ब्रह्मणो गुणैः ॥ य एतामात्म
वीर्येण त्रिलोकीं पूरयिष्यति ॥६॥

सौहृदं च भविष्यति ॥३॥ तेभ्यो दास्ये किं पुनर्युष्मभ्यमिति शेषः ॥४॥ अग्रहीष्ट गृहीतवंतः अथो इति हेतोः
लोकाननु लोकेषु भविष्यति ॥ यद्वा ॥ लोकाननुभविष्यति ॥ इत्यतिव्याप्स्यतीत्यर्थः ॥५॥ आत्मनो वीर्येणा सेता

गग ॥२॥

भा॰च॰ पुत्रार्थमात्रेभार्यौसंपादयति॥ कंडुरितिविप्रर्षिः॥ तपोनाशार्थमिंद्रप्रेषितयाप्रम्लोचया॥ कंडुर्नामऋषिर्बहुकालं
११२ रेमेसाचततःस्वर्गंगच्छंतीकंडोर्जातंगर्भंवृक्षेषुत्यक्त्वाजगामततदेतदुक्तं॥ अपविद्धांत्यक्तां॥१३॥ सप्रसिद्धोव
नसतीनांराजासोमः॥ प्रमतसुताविण्णीदेशनीतर्जनी हदंत्यस्त्वसामखेतिदर्ध्ये॥ अनेनाप्सरसोगर्भसंभवे
नाम्रताहारेणचतस्यालावण्येक्कमहेंद्रदोगंधादिराहित्यंचोक्तं॥१४॥ मामनुवर्जमानेनपित्रातिपुत्राः स

कंडोःप्रम्लोचयावंत्यालव्याकमललोचना॥ तांचापविद्धांजगृहुर्भूरुहानृपनंदना॥१३॥ नृततः
मायामृताराजासोमःपीयूषवर्षिणी॥ देशिनीरोदमानायानिदधेसदयान्वितः॥१४॥ प्रजाविसर्गआ
दिष्टाःपित्रामामनुवर्त्तता॥ तत्रकन्यांवरारोहांतामुद्वहतमाचिरम्॥१५॥ अपृथग्धर्मशीलानांस
र्वेषांवःसुमध्यमा॥ अपृथग्धर्मशीलेयंभूयात्पत्न्यर्पिताशया॥१६॥ दिव्यवर्षसहस्राणांसहस्रमह
तौजसः॥ भौमान्भोक्ष्यथभोगान्वैदिव्यांश्चानुग्रहान्मम॥१७॥ अथमय्यनपायिन्याभक्त्यापक्वगुणाशया
याः॥ उपयास्यथमद्धामनिर्विद्यनिरयादतः॥१८॥

तः तत्रप्रजासर्गेनिमित्तेनाम्रवृहत॥१५॥ ननुबहूनांकथमेकाभार्यास्यात्तत्राह॥ अपृथग्धर्मःशीलंच
येषांतेषांचपत्नीभूयात्॥ अर्पितोभवत्स्वाशयोयया धर्मशीलयोरैक्यात्॥ मद्धाक्याचनदोषःइष्टविरो
धःश्रुतिभावः॥१६॥ इतोमत्तःअप्रतिहताःबलाःसत॥१७॥ एकगुणादग्धकर्मादिमलस्त्वाशयोयेषां॥ अ
तःलोकद्वयभोगान्निरयप्रायान्निर्विद्यमत्स्थानंप्राप्स्यथ॥१८॥॥

ननु गृहेष्वप्रविष्टानामस्माकं तदासत्त्वावं एव स्यात् ॥ कुतस्त्वद्भक्तिर्वेदो वा तत्राह ॥ गृहेष्विति ॥ कुशलं
मय्यर्पितं कर्म येषां महात्मनां यायातो यामः कालो येषां ॥ १९ ॥ तद्वार्त्ता श्रोत्रेणां गृहे नैवं यद्यस्ति कुतस्तत्राह
नत्वदिति ॥ यद्यस्मात्कथाश्रवणात् ॥ तः सर्वज्ञोहमीश्वरः ब्रह्मवादिभिः प्रवक्तृभिः निमित्तभूतैः श्रोत्र
णोहृदयेनस्य वतप्रतिपदं नूतनं वत ॥ अथेषां मोमिब्रह्मसाक्षात्कारोभवतीत्यर्थः ॥ ननु नत्कथाश्रवणेक
थं ब्रह्मसाक्षात्कारस्तत्राह ॥ योहं एतदेव ब्रह्मतत्र गृहेतः ॥ यतो गताः ॥ येमां मामाः संतोशोकमोहहर्षाद्य

गृहेष्वाविशतां चापि पुंसां कुशलकर्मणां ॥ मद्वार्त्तायातयामानां न बंधाय गृहा मताः ॥ १९ ॥ न
न्वत्र हृदये पद्मो ब्रह्मैतद्ब्रह्मवादिभिः ॥ न मुह्यंति न शोचंति न हृष्यंति यतो गताः ॥ २० ॥ मैत्रेय उवा
च ॥ एवं ब्रुवाणं पुरुषार्थभाजनं जनार्दनं प्रांजलयः प्रचेतसः ॥ तद्दर्शनध्वस्ततमोरजोमला गि
रा गदन्गद्गदया सुहृत्तमं ॥ २१ ॥ प्रचेतस ऊचुः ॥ नमो नमः क्लेशविनाशनाय निरूपि
तोदारगुणाह्वयाय ॥ मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः ॥ २२ ॥

प्राप्नुवंति ॥ अतो मत्कथाश्रवणेन नन्वत्र नम मत्याविर्भावादस्यैव ब्रह्मसाक्षात्कारत्वात् ॥ गृहेष्वेवस
तामपि न्वबंधं इत्यर्थः ॥ २१ ॥ पुरुषार्थभाजनं यति प्रापयतीति तथा तं ॥ २२ ॥ वेदैः सकलश्रेयः साधनत्वेन नि
रूपिता उदारगुणाः ॥ आह्वयाना मानि यस्य मनो वचसो वेगादपि पुरोग्रतो जवो वेगो यस्य ॥ मनोवचसो
रगोचराय इत्यर्थः ॥ अत एव सर्वे यांश्च ताणां मार्गैः ॥ अगतः अनवगतोध्वा यस्य तस्मै ते नमः ॥ २२ ॥

स्वनिष्ठया स्वरूपस्थित्या शुद्धाय॥ अतः शांताय मनसि निमित्ते सति अपार्थेऽपार्थमेव विलसत विस्फुरितं द्वयं
रूपं यस्मिन् अगृहीता माया गुणैर्विग्रहा॥ ब्रह्मादि स्वर्तेयो येन॥२३॥ हे तत्त्व विशुद्धसत्त्वरूपाय संसारं हरति
भा॰च॰ मेधात्मानं यस्य तस्मै॥२४॥२५॥ अप्युक्तमहिकृतवंतो वयं॥२६॥ यद्दुकेवरं कृष्णौ भिमिति तन्मनसि निधायाह॥
११८

शुद्धाय शांताय नमः स्वनिष्ठया मनसा पार्थे विलसद्द्वयाय॥ नमो जगत्स्थानलयोदयेषु गृहीत
मायागुणविग्रहाय॥२३॥ नमः कमलनाभाय नमः कमलमालिने॥ नमः कमलपादाय नमस्ते
कमलेक्षण॥२४॥ नमो विशुद्धसत्त्वाय हरये हरमेधसे॥ वासुदेवाय कृष्णाय प्रभवे सर्वसात्वतां
२५॥ नमः कमलकिंजल्कपिशंगामलवाससे॥ सर्वभूतनिवासाय नमो युंक्ष्महि साक्षिणे॥२६
रूपं भगवता तेन दशेषक्लेशसंक्षयं॥ आविष्कृतेन नः क्लिष्टानां किमस्मदनुकंपितं॥२७॥ एतावंतं
हि विभो मिभोक्ष्यं दीनेषु वत्सलैः॥ यदद्य सर्वभूतेकाले सद्बुध्या भद्रं यथन॥२८॥

रूपमिति॥ समस्तानां क्लेशानां संक्षयो यस्मात् नः आविष्कृतं प्रकटितं अतोऽस्मत किमनुकंपितं अनुकंपा
द्य एवास्माकं परमा तु कं येत्यर्थः॥२७॥ कुत इत्यत आह॥ हे अभद्रं यथन अमंगलनाशन त्वमस्मयोः प्र
नविवदितः॥ एतावदेव दीनेषु वत्सलैः प्रभुभिभौक्तव्य कार्यं किं तत॥ तदाह॥ यदिति॥ अस्मदीयापत्तय इ\
ति बुध्या उचिते काले अनुस्मर्यते इति यत् तथानुरूपं दर्शितं इति भावः॥२८॥ ११८

येनानुस्मरणेन स्मृतानां तेषामुपशांतिः सद्यो भवति॥ किंच॥ क्षुल्लकानामपि भूतानां अंतर्हृदये अंतर्हितः॥
अंतर्यामित्वेन स्थितो भवानीहतामिच्छतां तत्तदुपासकानां नोऽस्माकं आशिषः कस्माद्धेतोर्न वेद जानात्येवेत्यर्थः
२९॥ तथापि वक्तव्यं चेत्तर्हि येषामस्माकं भगवान्प्रसन्नः॥ असावेव वरः॥ भगवत्प्रसाद एवास्माकमीप्सितो वर
इत्यर्थः॥ अपवर्गगुरुः मोक्षमार्गप्रदर्शकः गतिः सतत्स्वपुरुषार्थभूतः॥३०॥ यद्यप्येवं अथापि हे नाथ त्वत्त

येनोपशांतिर्भूतानां क्षुल्लकानामपीहतां॥ अंतर्हितोंऽतर्हृदये कस्मान्नो वेद नाशिषः॥ २९॥ असावेव वरो
ऽस्माकमीप्सितो जगतः पते॥ प्रसन्नो भगवान्येषामपवर्गगुरुर्गतिः॥ ३०॥ वरं वृणीमहेऽथापि नाथ त्वत्प
रतः परात्॥ न ह्यंतस्त्वद्विभूतीनां सोऽनंत इति गीयसे॥ ३१॥ पारिजातेंऽजसा लब्धे सारंगोऽन्यन्न सेवते॥ त्व
दंघ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि॥ ३२॥ यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः॥ तावद्भवत
प्रसंगानां संगः स्यान्नो भवे भवे॥ ३३॥

त्तः वरमेकं वृणीमहि॥ कथंभूतात्परतः कारणादपि प
रात्त्वत्तः परतः परत इति स्थितः॥ अतोऽपि यद्यपि त्वदातुं समर्थः॥ न च देयानां त्वद्विभूतीनां अंतोऽस्ति यतोऽनंत
विभूतित्वादनंत इति गीयसे॥ ३१॥ तथापि यथापि सारंगो भ्रमरः पारिजाते सुखेन लब्धे सति सुलभमप्य
मधु तं त्यक्त्वा अन्यं न सेवते॥ तथा वयमपि साक्षात्त्वदंघ्रिमूलं प्राप्य किं किं वृणीमहि न किंचिदित्यर्थः॥ यद्वा॥ किं
मप्यन्यत्तुच्छं किमर्थं वृणीमहि॥ अनंतत्वेन मनोरथानामनवस्थानादित्यर्थः॥ ३२॥ अत एतावदेव प्रार्थयाम

महइत्याह यावदिति॥ स्पृष्टा भ्रामिताः भवति भक्तेषु संगो येषां तेषां संगोऽस्माकं स्यात्॥३३॥

ननुराज्यभोगात्स्वर्गापुर्वींच विहायकिमिदंप्रार्थ्यते ॥ तत्राहुः ॥ नतुलयामेति ॥ भगवत्संगिनांसंगस्य वे
नापि ॥ २८ ॥ सत्संगस्यश्रेष्ठत्वंप्रपंचयति ॥ यत्रेतित्रिभिः ॥ यत्रयेषुयतः याभ्यः निर्वैरंवैराभावः ॥ २५ ॥ २९ ॥ पद्भ्यां
भा॰च॰ ११९ पावनेच्छयासंसारभीतस्य ॥ ३० ॥ सत्संगफलमस्माभिरेवानुभूतमित्याहुः ॥ कथाभ्यः वयंत्विति ॥ तववयं

नतुलयामलवेनापिनस्वर्गंनापुनर्भवं ॥ भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः ॥ २८ ॥ यत्रेड्यंतेक
थामृष्टास्तृष्णायाः प्रशमोयतः ॥ निर्वैरंयत्रभूतेषुनोद्वेगोयत्रकश्चन ॥ २९ ॥ यत्रनारायणःसाक्षाद्भ
गवान्न्यासिनांगतिः ॥ संस्तूयतेसत्कथासुमुक्तसंगैःपुनःपुनः ॥ ३० ॥ तेषांविचरतांपद्भ्यांतीर्थानांपा
वनेच्छया ॥ भीतस्यकिंनरोचेततावकानांसमागमः ॥ ३१ ॥ वयंतुसाक्षाद्भगवन्भवस्यप्रियस्यसख्युः
क्षणसंगमेन ॥ सुदुश्चिकित्स्यस्यभवस्यमृत्योर्भिषक्तमंत्वाद्यगतिंगताःस्म ॥ ३२ ॥ यन्नःस्वधीतंगुरवः
प्रसादिताः विप्राश्चवृद्धाश्चसदानुवृत्त्या ॥ आर्यानताःसुहृदोभ्रातरश्चसर्वाणिभूतान्यनसूययैव ॥ ३३ ॥
यन्नःस्वतप्तंतपएतदीशनिरंधसांकालमदभ्रमप्सु ॥ सर्वंतदेतत्पुरुषस्यभूम्नोवृणीमहेतेपरितो

प्रियः सखा तस्य भवस्य अथ यं तम चिकित्स्य भवस्य जन्ममृत्योः भिषक्तमं सद्वैद्यं त्वा त्वां गतिं प्राप्ताः ॥ ३२ ॥
वरांतरंवृणातेयन्नइतिद्वाभ्यां नताः नमस्कृताः ॥ ३३ ॥ निरंधसां निरन्नानां अदभ्रं बहुकालं तेपरितोषणाय

॥ ७ ॥ श्रीभागवते चतुर्थस्कंधे ॥ ४ ॥ ११९

अज्ञानानामप्यस्माकं तत्स्तुतिर्न युक्तेत्याहुः॥ मन्वादिति॥ यस्य तव महिम्नो न दृष्टं पारं यैः तेऽपि त्वां आत्मसमं
स्वशक्त्यानुरूपं यथा स्तुवंति॥ अथो अतः वयमपि गृणीमः॥४२॥ सतमूर्तये वासुदेवाय॥४३॥ यातेह
प्रयाणं अनिच्छतामपि सतां स्वधामनयो॥ अनपवर्गवीर्यः॥ अकुंठितप्रभावः॥४४॥ उदन्वतः सिंधोः स

मनुः स्वयंभूर्भगवान्भवश्च येऽन्ये तपोज्ञानविशुद्धसत्वाः॥ अदृष्टपारा अपि यन्महिम्नः स्तुवंत्यथो
त्वात्मसमं गृणीमः॥४२॥ नमः समाय शुद्धाय पुरुषाय पराय च॥ वासुदेवाय सत्त्वाय तुभ्यं भगव
ते नमः॥४३॥ मैत्रेय उवाच॥ इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्तथेत्याह शरण्यवत्सलः॥ अनि
च्छतां यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः॥४४॥ अथ निर्याय सलिलात्प्रचेतस उदन्व
तः॥ वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां गां रोद्धुमिवोच्छ्रितैः॥४५॥ ततोऽग्निमारुतौ राजन्नमुंचन्मुखतो रु
षा॥ महीं निर्वीरुधं कर्त्तुं संवर्त्तक इवात्यये॥४६॥ भस्मसात्क्रियमाणांस्तान्द्रुमान्वीक्ष्य पितामहः
आगतः शमयामास पुत्रान्बर्हिष्मतो नयैः॥४७॥

लिलान्निर्याय निर्गत्य गां महीं रोद्धुमिव उच्छ्रितैः द्रुमैश्छन्नां मही छन्नां वीक्ष्य द्रुमेभ्योऽकुप्यन् तदा हि प्राचीनब
र्हिषः प्रव्रजितत्वाद्राजके कर्षणाद्यभावात् द्रुमैर्भूमिः छन्नाभूत॥४५॥ निर्वीरुधां वीरुधोऽपि यस्यां तथा
भूतां कर्त्तुं संवर्तकः। कालाग्निरुद्रः॥४६॥ नयैर्युक्तिभिः॥४७॥ ॥

उक्तंहि॰ समर्थयामास॥४४॥मारिषांवार्क्षीप्रजनयोनिर्ब्रह्मात्तस्माज्जातोदक्षःमहत्तः श्रीमहादेवस्याव
भा॰च॰ ज्ञानात्पूर्वमजनयोनिजोब्रह्मपुत्रोपिसन्दक्षप्रियजातोयस्मामजिनिजातः॥४५॥प्राक्सर्गेपूर्वदेहेका
१२॰ लेनविद्रुतेगतेदेवेनस्वरेणचोदितः सन्सृष्टाः प्रजाः ससर्जदक्षः सइतिप्रसिद्धः॥४६॥स्वयाक्रचाप्रभयो

तस्यावशिष्टायेवृक्षाभीताउद्धितरेतदा॥उक्तंहि॰ तेप्रचेतोभ्यउपदिष्टाः स्वयंभुवा॥४७॥तेचब्रह्म
णआदेशात्स्तारिषामुपयेमिरे॥यस्यामहद्वज्ञानादजन्मजनयोनिजः॥४८॥चाक्षुषेत्वंतरेप्रा
प्तेप्राक्सर्गकालविद्रुते॥यःससर्जप्रजाःसर्वाः सदक्षोदेवचोदितः॥४९॥योजायमानःसर्वेषां
तेजस्तेजस्विनोरुचा॥स्वयोपादत्तदाक्ष्याच्चकर्मणांदक्षमब्रुवन्॥५०॥तंप्रजासर्गरक्षायामना
दिरभिषिच्यच॥युयोजयुयुजेन्यांश्चसवैसर्वप्रजापतीन्॥५१॥इतिश्रीभागवतेमहापुराणेचतु
र्थेस्कंधेत्रिंशोध्यायः॥३०॥

तेजउपादत्तआच्छादितवान्॥यंचकर्मसुदक्षमब्रुवन्॥५०॥तमभिषिच्यअनादिर्ब्रह्माप्रजा
सर्गसंरक्षणायांप्रयोज॥सदक्षोन्यान्मरीच्यादीन्॥तत्रतत्रापारेषुविनियुक्तवान्॥५१॥इतिश्रीभा
गवतेचतुर्थेत्रिंशोध्यायः॥३०॥ १२

एवं त्रिंशे स्मृते देवे ध्रुवं स्यस्य वने सतां ॥ नारदोक्तेन मार्गेण भक्तिरुक्ता प्रचेतसां ॥ ततः दिव्यवर्षसहस्राणां
सहस्रांते उत्पन्नविवेकज्ञानास्ते उपयास्यथ मद्धाम निर्विद्य निर्यात इत्यधोक्षजभाषितं स्मरंत आशु प्रा
व्रजन् ॥ १ ॥ ब्रह्मसत्रेण आत्मविमर्शेन दीक्षिताः कृतसंकल्पा बभूवुः ॥ सर्वेषु भूतेषु आत्मेति मेधा ज्ञानं यस्मि

मैत्रेय उवाच ॥ तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितं ॥ स्मरंत आत्मजे भार्यां विसृज्य प्राव्रजन्
गृहात् ॥ १ ॥ दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा ॥ प्रतीच्यां दिशि वेलायां सिद्धोभूद्यत्र जाजलिः
॥ २ ॥ तान्निर्जितप्राणवचोमनोदृशो जितासनाञ्छांतसमानविग्रहान् ॥ परेमले ब्रह्मणि योजितात्म
नः सुरासुरेड्यो ददृशे स नारदः ॥ ३ ॥ तमागतं त उत्थाय प्रणिपत्याभिनंद्य च ॥ पूजयित्वा यथादे
शं सुखासीनमथाब्रुवन् ॥ ४ ॥ प्रचेतस ऊचुः ॥ स्वागतं ते सुरर्षेद्य दिष्ट्या नो दर्शनं गतः ॥ तव चंक्रम
णं ब्रह्मन्नभयाय यथा रवेः ॥ ५ ॥ यदादिष्टं भगवता शिवेनाधोक्षजेन च ॥ तद्गृहेषु प्रसक्तानां प्रायशः
क्षपितं प्रभो ॥ ६ ॥

न्तेन तु वेलायां समुद्रतीरे जाजलिर्नाम ऋषिः ॥ २ ॥ निर्जिताः प्राणमनोवचोदृशो यैः तान् शांत उपर
ताः समाना मूलाधारादारभ्य ऋजवो विग्रहा येषां ब्रह्मणि योजित आत्मा यैः ॥ सुरासुरैरीड्यो दृष्टवान् ॥
उत्थाय तं प्रणिपत्य यथादेशं यथाविधि पूजयित्वा ॥ ४ ॥ ५ ॥ आदिष्टमुपदिष्टं यदात्मतत्त्वं तत्क्षपितं विस्मृतं ९

७॥ प्रचेतोभिः पृष्टः॥ ८॥ अहो अहह प्रमत्ततया हरिसेवां विना सर्वं जन्मकर्मादिकं व्यर्थं कृतमिति तान् शोच
न्नाह॥ जन्मेति चतुर्भिः॥ येनो यस्मात् हरिसेवैव फलं अतस्तद्विहीनं सर्वं व्यर्थमित्यर्थः॥ ९॥ शुक्लं संबंधि
जन्म विशुद्धमातापितृभ्यामुत्पत्तिः॥ सावित्रमुपनयनेन याज्ञिकं दीक्षया विबुधानामिव दीर्घायुषापि

भा॰च॰
२२१

ततः प्रद्योतयाध्यात्मज्ञानं तत्त्वार्थदर्शनं॥ येनांजसा तरिष्यामो दुस्तरं भवसागरं॥ ७॥ शुक उ
वाच॥ इति प्रचेतसा पृष्टो भगवान्ब्राह्मणोत्तमः॥ भगवत्युत्तमश्लोक आविष्टात्माब्रवीन्नृपान्॥ ८
नारद उवाच॥ तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः॥ ९॥ नृणां येन हि विश्वात्मा सेव्यते ह
रिरीश्वरः॥ ९॥ किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञिकैः॥ कर्मभिर्वा त्रयीप्रोक्तैः पुंसो
पि विबुधायुषा॥ १०॥ श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः॥ बुद्ध्या वा किं निपुणया बले
नेंद्रियराधसा॥ ११॥ किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि॥ किं वा श्रेयोभिरन्यैश्च न यत्रा
त्मप्रदो हरिः॥ १२॥

१०॥ वचोभिः वाग्विलासैः चित्तवृत्तिभिः नानावधानसामर्थ्यैः॥ इंद्रियाणां राधा पाटवेन॥ ११॥ योगेन
प्राणायामादिना सांख्येन देहादिव्यतिरिक्तात्मज्ञानमात्रेण संन्यासवेदाध्ययनाभ्यामपि॥ अन्यैरपि
व्रतवैराग्यादिभिः श्रेयःसाधनैः॥ १२॥ २२१

नवैषां नाना फलसाधनानां हरिसेवाभावमात्रेण कृतार्थ्यं वैयर्थ्यं ॥ तत्राह ॥ श्रेयसां फलानां मात्मैवावधिः परा-
काष्ठा अर्थतः परमार्थतः ॥ आत्मार्थत्वेनैवान्येषां प्रियत्वादित्यर्थः ॥ भवत्वात्मा अवधिः हरेः किमायातं तत्राह ॥
सर्वेषामपीति ॥ आत्मत्वस्याविद्यानिरासेन ॥ स्वरूपाभिव्यंजकः ॥ ऐश्वर्येण पितृरूपेण वलिप्रभृतिभ्यो प्यात्मप्रदः
प्रियत्वस्य परमानंदरूपता ॥ ३ ॥ किंच नानाकर्मभिस्तत्तद्देवताप्रीतिनिमित्तानामपि फलानि हरिप्रीत्या भवंति ॥ के-
वलं तत्तद्देवताराधनेन न किंचिदिति ॥ सदृष्टांतमाह ॥ यथेति ॥ मूलात्प्रथमभागाः स्कंधाः तद्विभागा भुजाः ते-

श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः ॥ सर्वेषामपि भूतानां हरिरात्मात्मदः प्रियः ॥ ३ ॥ यथा तरोर्मू-
लनिषेचनेन तृप्यंति तत्स्कंधभुजोपशाखाः ॥ प्राणोपहाराच्च यथेंद्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥ ४ ॥
यथैव सूर्यात्प्रभवंति वारः पुनश्च तस्मिन्प्रविशंति काले ॥ भूतानि भूमौ स्थिरजंगमानि तथा हरावेव गु-
णप्रवाहः ॥ ५ ॥

षामप्युपशाखाः उपलक्षणं पत्रपुष्पादयोपि तृप्यंति ॥ न तु मूलमेकं विना सहस्रनिषेचनेन प्राणस्योपहारो भो-
जनं तस्मादेवेंद्रियाणां तृप्तिः ॥ न तु तत्तदिंद्रियेषु पृथक्पृथग्गन्धलेपनेन ॥ तथाच्युताराधनमेव सर्वदेवताराध-
नं न पृथगिति तदर्थः ॥ ४ ॥ कृतस्य विमूलत्वादिति सदृष्टांतमाह ॥ यथैव वारः जलानि वर्षाकाले सूर्यादुद्भवंति ॥ ग्री-
ष्मे तस्मिन्नेव प्रविशंति अस्याः प्रसिद्धत्वेन दृष्टांतांतरमाह ॥ यथा भूतानि भूमाविति ॥ गुणप्रवाहश्चेतनाचेत-

नन्वहंकारादेव गुणप्रवाहः स्यात्केवलात्तावताचेन्न सोपाधिकस्याहंकारस्यादित्याशंक्याह एतदिति ॥ एतद्धि सर्वं विश्वोत्पत्त

भा॰च॰ सर्वेशात्प्रसिद्धं ॥ इदं सर्वं सर्वोपाधिरहितं तद्रूपपन्नत्वात्ततः कृत्यमित्यर्थः ॥ तर्हि कथमन्यथा भातीत्यत आह

१२२ सकृदिति ॥ सकृत्कदाचिद्विभातं स्फुरितं गंधर्वनगरवत् ॥ यथा सवितुः प्रधानतत्तो भिन्ना यथाकृता अति

असवं इंद्रियाणि सकरोति ॥ सुषुप्तौ तस्य सशक्तयो भवंतीत्यर्थः ॥ कथंभूतो सोऽहं गीरुच्यादीनां त्रिविधाहंका

रकार्याणां तन्निमित्तस्य भेदस्य भ्रमस्य चात्ययो यस्मात्सः ॥ यद्वा अजाग्रति सुषुप्तौ अस्य सर्वाः समाः शक्तयो येषां

एतत्पदं तज्जगदात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा ॥ यथासवो जाग्रति सुप्तशक्तयो द्रव्यक्रिया

ज्ञानभिदाभ्रमात्ययः ॥१६॥ यथा नभस्यभ्रतमः प्रकाशा भवंति भूपा न भवंत्यनुक्रमात् ॥ एवं परे ब्र

ह्मणि शक्तयस्त्वमू रजस्तमः सत्वमिति प्रवाहः ॥१७॥ तेनैकमात्मानमशेषदेहिनां कालं प्रधानं पु

रुषं परेशं ॥ स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा ॥१८॥ दयया सर्वभूतेषु संतुष्ट्या

येन केन वा ॥ सर्वेंद्रियोपशांत्या च तुष्यत्याशु जनार्दनः ॥१९॥

ते भवंति इत्यादेरयमन्वयो भवति सवितुः ॥

प्रभेत्यस्य द्वौ दृष्टांताविति ॥ ननु असंगे हरौ कथं प्रपंचोत्पत्तिलयौ तत्राह ॥ यथेति ॥ अभ्रतमः प्रकाशाश्च आग

मापायिनो रजस्तमः सत्वरूपास्तेषां देहभूपाः अचेतनाः अमूः शक्तयः न भवंति लीयंते इति ॥ एवमयं जगत्प्र

वाहः ॥१७॥ तेन सर्वकारणत्वेन हेतुना ॥ कालो निमित्तं प्रधानं उपादानं पुरुषः कर्ता ॥ एतत्त्रितयात्मकत्वा

त्सर्वकारणं परमेश्वरं ॥ अद्धा साक्षाद्भजध्वं ॥ कथं आत्मना एकभावेन अभिन्नत्वेन ॥१८॥ साधनमाह ॥ द

ततोनकदाचित्त्यजतीत्याह॥अपहृतानिनिरस्तानिसकलान्यघानिकामादयस्तानियस्मात्सचासावमलश्चात्मामनःतस्मि
न्स्तांमनसिनिरंतरमेधितयाभावनयोपहृतःसन्नतोहरिः॥छिद्रवत्तत्राकाशवत्॥ततोनसरतिना
पयातिहि॥किंकुर्वन्॥आत्मनोनिजजनवशगतत्वंस्वभक्ताधीनत्वमयन्॥अवगच्छन्॥१॥सतामेवंवश्योसौअ
सतांतदिज्यामपिनगृह्णातीत्याह॥नेति॥कुमनीषिणांकुत्सितमतीनां॥अधनाश्चते आत्मधनाभागवताः

अपहृतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः॥निजजनवशगत्वमात्मनोयन्नसर
तिच्छिद्रवदक्षरःसतांहि॥२०॥नभजतिकुमनीषिणांसइज्यांहरिरधनात्मधनप्रियोरसज्ञः॥श्रु
तधनकुलकर्मणांमदैर्येविदधतिपापमकिंचनेषुसत्सु॥२१॥श्रियमनुचरतींतदर्थिनश्चद्विपद
पतीन्विबुधांश्चयःस्वपूर्णः॥नभजतिनिजभृत्यवर्गतंत्रःकथममुमुद्विसृजेत्पुमान्कृतज्ञः॥२२

तेप्रियायस्य॥रसः भक्तिस्वादवत्तः केकुमनीषिणस्तत्राह॥श्रुतादिनिमित्तैर्मदैर्येसत्सुपापंतिरस्कारंकुर्वंति
२१॥भक्ताधीनत्वंप्रपंचयन्नाह॥अनुवर्तमानामपिश्रियंतदर्थिनःसकामान्द्विपदपतीन्नृपान्विबुधान्दे
वानपियोनानुवर्तते॥यतःस्वेनैवपूर्णः॥अतःस्वभृत्यवर्गानुरक्तएव॥एवंभूतममुंमनीषीकोपिकथंपरित्यजेत् २२

प्रचेतसः कर्मभूतान्॥ अन्याश्चानूनंमहनीतेरित्यादि भवचरितायाः॥ स्वेगायन्॥ प्रचेतसामिस्तकतात्॥ ५६

मैत्रेय उवाच॥ इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः॥ श्रावयित्वा ब्रह्मलोकं ययौ स्वायंभुवो मुनिः॥
२३॥ तेपि तन्मुखनिर्यातं यशो लोकमलापहं॥ हरेर्निशम्य तत्पादं ध्यायंतस्तद्गतिं ययुः॥२४॥ ए
तत्तेभिहितं क्षत्तर्यन्मां त्वं परिपृष्टवान्॥ प्रचेतसां नारदस्य संवादं हरिकीर्तनं॥२५॥ श्रीशुक उवाच॥
य एष उत्तानपादस्य मानवस्यानुवर्णितः॥ वंशः प्रियव्रतस्यापि निबोध नृपसत्तम॥२६॥ यो नारदादा
त्मविद्यामधिगम्य पुनर्महीं॥ भुक्त्वा विभज्य पुत्रेभ्य ऐश्वर्यं समगात्पदं॥२७॥ इमां तु कौषारविणो
पवर्णितां क्षत्ता निशम्याजितवादसत्कथाम्॥ प्रवृद्धभावोश्रुकलाकुलो मुनेर्दधार मूर्ध्ना चरणं
हृदा हरेः॥२८॥

२३॥२४॥ प्रचेतसां नारदस्य च संवादरूपमेतदाख्यानं तेभिहितं॥ हरेः कीर्तनं यस्मिन् तत्॥२५॥ य एष वं
शः सोऽनुवर्णितः॥२६॥ यः प्रियव्रतः॥२७॥ [illegible]॥ १२१

स्नानज्ञातीन्दिदृक्षुः ॥२९॥ २॥ एतच्चरितमितिशेषः ॥३१॥ इतिश्रीभागवतभावार्थदीपिकायांचतु

भा॰ च॰
१२८

विदुर उवाच ॥ सोऽयं तेन महायोगिन् भवता करुणात्मना ॥ दर्शितः तमसः पा
रोयत्राकिंचनगो हरिः ॥२९॥ इत्यानम्य तमामंत्र्य विदुरो गजसाह्वयम् ॥ स्वानां दि
दृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः ॥३०॥ एतद्यः शृणुयाद्राजन् राज्ञां हर्यर्पितात्म
नाम् ॥ आयुर्धनं यशः स्वस्ति गतिमैश्वर्यमाप्नुयात् ॥ ३१ ॥ इति श्रीभागवते महा
पुराणे चतुर्थस्कंधे प्रचेतसोपाख्यानं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

र्थस्कंधे एकत्रिंशोऽध्यायः ॥३१॥ ॥॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥॥

राम
१२८

चतुर्थस्कंध:

Acc. No
743.

145

चतुर्थस्कंद [illegible]